॥ तैत्तिरीयोपनिषत्खंडार्थप्रारंभः ॥

SGDF
Sri Gargeshwari Digital Foundation

श्रीमद्भनुमद्भीममध्वांतर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवायनमः ॥ श्रीब्रह्मशेषरुद्रादिदैवतैस्सर्ववेदगैः । वचोभिरीडितंविष्णुंनानारूपमुपास्महे ॥ १ ॥ प्रणम्यश्रीमदानंदतीर्थादिगुरुशेखरान् । तैत्तिरीयोपनिषदःकरिष्याम्यर्थसंग्रहं ॥ २ ॥ भाष्यस्यार्थोव्यासतीर्थटीकातोह्यवगम्यते । विक्षिप्तत्वादुपनिषदर्थस्यैवात्रसंग्रहः ॥ ३ ॥ अस्याउपनिषदोरविमंडलगोविष्णु ब्रह्मावरुणोभृगुश्चेतिक्रमादृषयश्चत्वारः । सएवहरिर्देवता । वाक्यरूपत्वान्नच्छंदोन्वेषणं । शन्नोमित्रआवहंतीत्यादौछंदोबद्ध स्थलेऽक्षरपरिगणनयानुष्टुबादिबोध्यं । ब्रह्मविद्यामभ्यसन्भृगुर्विघ्नविघातार्थदेवान्प्रार्थयते । शन्नोमित्रइत्यादिना । मित्रः

ॐ ओंशन्नोमित्रःशंवरुणः । शन्नोभवत्वर्यमा । शन्नइंद्रोबृहस्पतिः । शन्नोविष्णुरुरुक्रमः । नमो ब्रह्मणे । नमस्तेवायो । त्वमेवप्रत्यक्षंब्रह्मासि । त्वमेवप्रत्यक्षंब्रह्मवदिष्यामि । ऋतंवदिष्यामि । सत्यंवदिष्यामि । तन्मामवतु । तद्वक्तारमवतु । अवतुमां । अवतुवक्तारं । ओंशांतिःशांतिःशांतिः॥१॥

नोऽस्माकंशंसुखकरोभवत्वितिसर्वत्रान्वेति । एवमग्रेप्यर्थोबोध्यः । वायोर्ब्रह्मविद्याप्रवर्तकेषुमुख्यत्वात्परब्रह्मणोमुख्याधिष्ठान त्वाच्चतन्नतिस्तुतीकुर्वन्पृथक्प्रार्थयते । नमइत्यादिना । तत्रवदिष्यामीत्यंतेनस्तुतिः । तन्मामित्यादिनाप्रार्थनेतिविवेकः । ब्रह्मणेपरब्रह्माधिष्ठानाय । ज्ञानादिगुणबृंहिततयाब्रह्मपदवाच्यायेतिवा । प्राणोब्रह्मेतिश्रुतेः । अध्यात्मरूपंनत्वाअधिदैवरू पंनमति । नमस्तइतिवा परोक्षतोनत्वाऽपरोक्षतोनमतिनमस्तइतिवार्थः । वाग्वैब्रह्मेतिकाण्वश्रुतेःवाण्यैनमइतिवा । विरिंचा

॥ १ ॥

येतिवा । नतंवायुंस्तौति । त्वमेवेति । प्रत्यक्षभूतप्राणापानादिवायुवृत्तिशरीरकत्वात्प्रत्यक्षमित्युक्तिः । मुख्यवायोःप्राणा दिपंचात्मनावक्ष्यमाणानांसंहितायाःपंचाधिकरणानांअभिमानिदेवतात्वं पृथिव्यंतरिक्षंद्यौरित्यादिनोक्तंपाङ्क्तत्वंचास्ति अभि मन्यमानोक्तिरेवाभिमान्युक्तिरितितदभिप्रायेणाहभृगुःत्वमेवप्रत्यक्षंब्रह्मवदिष्यामीति । अक्षिअक्षिप्रतिप्रत्यक्षं प्रतिपरसमनु भ्योक्ष्णइतिसमासांतः । प्रतिगृहंकूपइतिवत् । नियामकतयासर्वेंद्रियस्थमितिवाप्रत्यक्षमित्यस्यार्थः । त्वमित्यस्यत्वामित्यर्थो व्यत्ययात् । ऋतंयथार्थज्ञानवंतं । सत्यंयथार्थज्ञानपूर्वकंवक्तारंकर्तारंचेत्यर्थः । प्रत्येकंक्रियाभ्यासआदरार्थः । ततूत स्मात् । त्वन्नंतृत्वात्त्वद्वदितृत्वाच्च मांवक्तारमितिसामानाधिकरण्यंवा । मांवक्तारंआचार्यंचेतिवा । अभ्यासःप्राग्वत् ।

शीक्षांव्याख्यास्यामः । वर्णःस्वरः । मात्राबलं । सामसंतानः । इत्युक्तःशीक्षाध्यायः ॥ २ ॥

ओंवाय्वादौसर्वत्रव्याप्ततयारक्षकत्वेनचॐपदवाच्येनविष्णुनाशांतिरस्त्वित्यर्थः । दिव्यांतरिक्षभौमानिष्टनिरासायशांतिरि तित्रिरुक्तिः । आध्यात्मिकाधिभौतिकाधिदैविकानिष्टनिरासार्थंत्रिरुक्तिरित्येके ॥ १ ॥ ब्रह्मविद्याभ्यासार्थिनःपूर्वंशिक्ष णीयमर्थंप्रतिज्ञापूर्वकमाह । शीक्षामिति । शिक्ष्यतइतिशिक्षा । शिक्षणीयमर्थंविविच्यस्पष्टंवक्ष्यामइत्यर्थः । शीक्षे तिदैर्घ्यंच्छांदसं । प्रतिज्ञातमाह । वर्णइत्यादिना । वर्णअकारादिवर्णोच्चारणस्थानानिकंठताल्वादीनि । ज्ञातव्यप दंसर्वत्रयोज्यं । स्वरउदात्तादिः । मात्राएकमात्रादिः । बलंवर्णोच्चारणप्रयत्नोविवृतादिः । सामवर्णानांसंधिः । सं

तानोवर्णमाला । नकेवलंवर्णोत्पत्तिस्थानादिकमेवज्ञातव्यं । वरणीयत्वहेतुनावर्णनामकंवर्णस्थंवर्णवाच्यंपुरुषेवर्णोच्चारण क्रियाप्रदंविष्णोरूपंवर्णइतिज्ञेयं । स्वस्मिन्नमतइतिव्युत्पत्त्योदात्तादिस्वरनामकंस्वरवाच्यंस्वरगतंपुरुषेस्वरोच्चारणक्रियाप्रदं रूपंस्वरइत्यनेनज्ञेयं । मानात्ज्ञानान्निमित्ताद्यातेतिव्युत्पत्त्यामात्रानामकंमात्रास्थितंमात्रावाच्यंमात्रोच्चारणक्रियाप्रदंरूपंमा त्रेत्यनेनज्ञेयं । बलरूपतयाबलनामकंबलस्थंविवृतादिपुरुषगतप्रयत्नरूपक्रियाप्रदंरूपंबलमित्यनेनज्ञेयं । सर्वरूपेषुसमत्वहेतु नासामनामकंसामवाच्यंसामशब्दितसंधिस्थंपुंगतसंध्युच्चारणक्रियाप्रदंरूपंसामेतिज्ञेयं । गुणादिनासंततत्वनिमित्तेनसंतान

सहनौयशः । सहनौब्रह्मवर्चसं । अथातःसंहिताया उपनिषदंव्याख्यास्यामः । पंचस्वधिकरणे षु । अधिलोकमधिज्यौतिषमधिविद्यमधिप्रजमध्यात्मं । तामहासंहिताइत्याचक्षते ॥ ३ ॥

नामकंवर्णसंततिस्थंसंतानवाच्यंपुरुषगतसंतानोच्चारणक्रियाप्रदंरूपंसंतानइत्यपिज्ञेयं । शीक्षाध्यायः । अध्यायइतिग्रंथसं दर्भनाम । शीक्षाशिक्षणीयोर्थोयस्मिन्नध्यायेसशीक्षाध्यायः । इत्येवमुक्तइत्यर्थः । प्रतिज्ञोपसंहारयोरुक्तिरुक्तेर्थेवधान द्योतनार्था । एवमग्रेपिज्ञेयं ॥ २ ॥ आदावेवाविघ्नत्वार्थंकृतेपिप्रार्थनेप्रतिविद्यमविघ्नताप्रार्थनीयेतिभावेनअथातइति वक्ष्यमाणविद्यायाअविघ्नत्वायप्रार्थयते । सहेति । सप्रागुक्तोमित्रादिर्नौगुरुशिष्ययोर्यशस्करोब्रह्मवर्चस्करोभवत्वित्यर्थः । इदानींसामेतिप्रकृतवर्णसंधिनिष्ठांब्रह्मविद्यामाह । अथेति । वर्णादिशिक्षोक्त्यनंतरं अतःफलवत्त्वात् संहितायाःपूर्वोत्तर

॥ २ ॥

SGDF Sri Gargeshwari Digital Foundation

वर्णसंधिसंधानभेदेनचतूरूपायाःसंहितायाउपनिषदंरहस्यंप्रतिपाद्यत्वेनवातन्निष्ठत्वेनवास्थितंरूपजातंव्याख्यास्यामइत्यर्थः । व्या(ख्यास्यमानसंहि)ख्येयसंहितासंबंधिरूपजातस्यस्थानान्याह । पंचस्वधिकरणेष्विति । स्थितामुपनिषदमितिपूर्वेणान्वयः । तान्याह । अधिलोकमित्यादिना । लोकेष्वधिआधि(कृत्यस्थितंअधिलो)लोकं । ज्योतिष्वधिअधिज्यौतिषमित्यादिविग्रहोध्येयः । लोकेषुज्योतिस्सुविद्यास्वित्यादिरर्थः । चतुरात्मकलोकादिवर्गपंचकेप्रत्येकंचतुरात्मतयास्थितंनारायणाद्यनिरुद्धांतंरूपपंचकंचतुरात्मकसंहिताप्रतिपाद्यत्वेनतत्संस्थत्वेनवाव्याख्यास्यामइतिसमुदायार्थः । आदरजननायसंहितांस्तौति । ता इति । ताःउक्तविधभगवद्रूपप्रतिपादिकाःपूर्वोत्तरवर्णसंधिसंधानभेदेनचतुरात्मिकाःसकलवेदगताःसंहिताःमहद्ब्रह्मप्रतिपादक

अथाधिलोकं । पृथिवीपूर्वरूपं । द्यौरुत्तररूपं । आकाशःसंधिः । वायुःसंधानं । इत्यधिलोकं ॥ ४ ॥

तयामहासंहिताइत्याचक्षतइत्यर्थः ॥ ३ ॥ अधिलोकमित्याद्युक्तंविवृणोति । अथाधिलोकमिति । लोकेषुस्थितंभगवद्रूपचतुष्टयंचतूरूपसंहिताप्रतिपाद्यंतत्स्थंवा । अथमहासंहितात्वादेवव्याख्यास्यामइत्यनुषंगः । पृथिवीति । पृथिवीस्थितंपृथिवीनामकंनारायणवासुदेवाख्यंरूपंपूर्वरूपं । संहितायाःपूर्ववर्णेनरूप्यतेप्रतिपाद्यतइतिपूर्वरूपं । द्यौर्द्युलोकस्थंद्युनामकंनारायणसंकर्षणाख्यंरूपंसंहितायाउत्तररूपं । उत्तरवर्णप्रतिपाद्यं । आकाशःआकाशस्थंआकाशनामकंनारायणप्रद्युम्नाख्यंसंधिः । सन्निकर्षप्रतिपाद्यं । वायुःवायुस्थंवायुनामकंनारायणानिरुद्धाख्यंरूपंसंधानंसंधिकार्यप्रतिपाद्यं । इतिप्रतिपाद्यप्रतिपादकाभिप्रायेण

SGDF
Sri Gargeshwari Digital Foundation

पृथिवीपूर्वरूपमित्याद्युक्तिः । यद्वापृथिव्यादिषुचतुर्षुस्थितानिपृथिव्यादिनामकानिनारायणवासुदेवनारायणसंकर्षणनारायण प्रद्युम्ननारायणानिरुद्धाख्यानिचत्वारिरूपाणिसंहितायाःपूर्वोक्त(रवर्ण)रार्णसंधिसंधानेषुतिष्ठंतीत्याधाराधेयाभिप्रायेणपृथिवीपूर्वरूपमित्याद्युच्यतइतिज्ञेयं । इत्यधिलोकमिति । इतिएवंप्रकारेणलोकेष्वधिकृत्यस्थितंरूपचतुष्टयंचतूरूपसंहितास्थंव्याख्यातमित्यर्थः । अत्रपृथिव्यादीनामभिमानिनयन्यायेनदेवतापरत्वमुपेत्यपृथिवीदेवतास्थमित्यादिरर्थइत्याहुः ॥ ४ ॥ अथाधिज्यौतिषमिति । अथेत्यर्थांतरे । अधिलोकोक्त्यनंतरमितिवा । चतुरात्मकज्योतिर्गतरूपचतुष्टयंचतुःस्वरूपसंहितासंबंधी

अथाधिज्यौतिषं । अग्निःपूर्वरूपं । आदित्यउत्तररूपं । आपःसंधिः । वैद्युतःसंधानं । इत्यधिज्यौतिषं ॥ ५ ॥

त्येतद्व्याख्यास्यामइत्यर्थः । अग्निःपृथिवीगताग्निस्थंअग्निनामकंवासुदेववासुदेवाख्यंसंहितायाःपूर्वरूपं । पूर्ववर्णप्रतिपाद्यमितिवा पूर्ववर्णस्थमितिवाद्वेधापूर्वरूपत्वंध्येयं । एवमुत्तररूपमित्यादावप्यर्थोबोध्यः । आदित्यइति । द्युलोकस्थादित्य(गतंआ)स्थंआदित्यनामकंवासुदेवसंकर्षणात्मकंरूपंसंहितायाउत्तररूपं । आपःअप्सुस्थितंअन्नामकंवासुदेवप्रद्युम्नात्मकंरूपंसंधिः । संहितायाःसन्निकर्षः । वैद्युतःविद्युत्समूहगतंवैद्युताख्यंवासुदेवानिरुद्धाख्यंसंधानमित्यर्थः । इत्यधिज्यौतिषमिति । इत्यधि

लोकमित्यत्रेवव्याख्या ॥ ५ ॥ अथाधिविद्यमिति । पूर्ववद्व्याख्येयं । आचार्यःआचार्यस्थंआचार्यनामकंसंकर्षणवासुदेवात्मकंरूपंसंहितायाःपूर्वरूपंपूर्ववर्णस्थंपूर्ववर्णप्रतिपाद्यमितिवा । अंतेवासीअंतेवासिस्थंअंतेवासिनामकंसंकर्षणसंकर्षणात्मकंरूपंसंहितायाउत्तररूपं । विद्या गुरुशिष्यसंघर्षजंज्ञानंविद्या । विद्यास्थंविद्यानामकंसंकर्षणप्रद्युम्नाख्यंरूपंसंधिःसन्निकर्षः । प्रवचनं प्रवचनस्थंप्रवचननामकंसंकर्षणानिरुद्धाख्यंरूपंसंधानंसंधिकार्यं । इत्यधिविद्यं । व्याख्यानंप्राग्वत् ॥ ६ ॥ अथाधिप्र

अथाधिविद्यं । आचार्यःपूर्वरूपं । अंतेवास्युत्तररूपं । विद्यासंधिः । प्रवचनंसंधानं । इत्यधिविद्यं ॥ ६ ॥ अथाधिप्रजं । मातापूर्वरूपं । पितोत्तररूपं । प्रजासंधिः । प्रजननंसंधानं । इत्यधिप्रजं ॥ ७ ॥ अथाध्यात्मं । अधराहनुःपूर्वरूपं । उत्तराहनुरुत्तररूपं । वाक्संधिः । जिह्वासंधानं । इत्यध्यात्मं । इतीमामहासंहिताः । यएवमेतामहासंहिताव्याख्याता वेद । संधीयतेप्रजयापशुभिः । ब्रह्मवर्चसेनान्नाद्येनसुवर्गेणलोकेन ॥ ८ ॥

जमित्यपिप्राग्वत् । माता मातृस्थंमातृनामकंप्रद्युम्नवासुदेवात्मकंरूपंसंहितायाःपूर्वरूपं । पिता पितृस्थंपितृनामकंप्रद्युम्नसंकर्षणात्मकंरूपंसंहितोत्तररूपं । प्रजा प्रजास्थंप्रजानामकंप्रद्युम्नप्रद्युम्नात्मकंरूपंसंधिः । प्रजननं प्रजननस्थंप्रजननानामकंप्रद्युम्नानिरुद्धात्मकंरूपंसंधानं । इत्यधिप्रजमित्युक्तार्थः ॥ ७ ॥ अथाध्यात्ममितिप्राग्वत् । आत्मनिदेहेअधीतिविग्रहः । अधराहनुः

SGDF Foundation

तत्स्थंतन्नामकंअनिरुद्धवासुदेवात्मकंरूपंपूर्वरूपं । उत्तराहनुः तत्स्थंतन्नामकंअनिरुद्धसंकर्षणात्मकंरूपंउत्तररूपं । वाक्वागिंद्रियस्थंवाङ्नामकंअनिरुद्धप्रद्युम्नात्मकंरूपंसंधिः । जिह्वाजिह्वास्थंजिह्वानामकंअनिरुद्धानिरुद्धात्मकंरूपंसंधानंसंधिकार्यं । इत्यध्यात्ममितिप्राग्वत् । संहिताःस्तौति । इतीमाइति । विष्णुरूपमहार्थकत्वान्महासंहिताइति । नकेवलंमहार्थत्वान्महत्त्वंसंहितानां । किंतुमहाफलवत्त्वाच्चमहत्त्वमितिभावेनअथातइत्यत्रअतःशब्देनसूचितंफलमाह । यएवमिति । यःकश्चित्सात्विकोऽधिकारीएवंनारायणादीन्यनिरुद्धांतानिप्रत्येकंवासुदेवादिचतुरात्मतयापृथिव्यादिवर्गपंचकगतानिचतूरूपसंहितास्थानीतिव्या

यच्छंदसामृषभोविश्वरूपः । छंदोभ्योध्यमृतात्संबभूव । समेंद्रोमेधयास्पृणोतु । अमृतस्यदेवधारणोभूयासं । शरीरंमेविचर्षणं । जिह्वामेमधुमत्तमा । कर्णाभ्यांभूरिविश्रुवं । ब्रह्मणःकोशोसिमेधयापिहितः । श्रुतंमेगोपाय ॥ ९ ॥

ख्यातामहासंहितामहासंहितारूपाणिवेदउपास्तेसाक्षात्करोतिच सइतिशेषः । प्रजयेत्यादिनास्वयोग्यसर्वभोगउपलक्ष्यते । सुवर्गलोकपदेनश्वेतद्वीपादिविष्णुस्थानग्रहः । विष्णुलोकेनप्रजाद्युपलक्षितस्वयोग्यसर्वभोगेनचसंधीयतेसंयुक्तोभवतीत्यर्थः । ब्रह्महस्तिभ्यांवर्चसइत्यचप्रत्ययविधानात्ब्रह्मवर्चसेनेतिसाधु । अन्नाद्येनअन्नादिनेत्यर्थः ॥८॥ विद्याभ्यासिनोमेधाप्राप्त्यर्थंकांचनविद्यामाह । यच्छंदसामिति । यइंद्रःपरमेश्वरःछंदसामृषभोधिपतिर्नियंतेतियावत् । विश्वरूपःपूर्णविग्रहस्वरूपः । नानारूपइतिवा ।

SGDF
Sri Gargeshwari Digital Foundation

इंद्रोमायाभिःपुरुरूपईयतइत्यादेः। अमृतात् अमृतेभ्यःव्यत्ययात् नित्येभ्यःछंदोभ्यःवेदेभ्यःअधिसंबभूवअधिकतयासुव्यक्तः सइंद्रःमामांमेधयाप्रज्ञयास्पृणोतु। स्पृक्प्रीतिरक्षणयोरितिधातुपाठात्। स्पृक्प्रीतिरक्षणयोरितिकविकल्पद्रुमोक्तेः। प्रीणयतु प्रीणनंबलं। बलयतु। मेधाविनंकरोतु। हेदेवअमृतस्यनित्यस्यवेदस्यधारणःधारकोभूयासं। तत्वज्ञानीभूत्वाक्षिप्रंमुक्तःस्यामितिभावः। मेशरीरंविचर्षणं विशिष्टाश्चर्षणयःप्रजाःयस्यतत्विशिष्टशिष्यप्रजायुक्तंभूयादितिविपरिणामेनान्वयः। मेजिह्वामधुमत्तमाअतिशयेनमधुमती। मधुरभाषिणीसुखसाधनभगवद्बोधकवेदोच्चारणवतीभूयादित्यर्थः। कर्णाभ्यांभूरिब्रह्मविश्रुवं।

आवहंतीवितन्वाना। कुर्वाणाचीरमात्मनः। वासांसिममगावश्च। अन्नपानेचसर्वदा।
ततोमेश्रियमावह। लोमशांपशुभिःसहस्वाहा॥ १०॥

विशेषेणशृणवानीतिव्याख्यातैषाश्रुतिःकर्मनिर्णयटीकायां। त्वत्तोमेवेदप्रार्थनंत्वद्विषयमेधाप्रार्थनंचयुक्तं। तवतदुभयवत्त्वादितिभावेनाह। ब्रह्मणइति। ब्रह्मणोवेदस्यकोशोसिआवासोसि। मेधयाप्रज्ञयापिहितःआच्छादितः। संपूर्णज्ञानोसीत्यर्थः॥ मेश्रुतंमयाश्रुतंगोपायरक्ष। गुपूरक्षणे। गुपूधुपविच्छिपणिपनिभ्यआयइतिआयप्रत्ययः। फलवत्कुर्वित्यर्थः॥९॥ विद्याभ्यासिनोमनःक्षोभनिरासायअन्नादिनाभाव्यं। अतस्तदर्थकांचनविद्यामाह। आवहंतीति। आत्मनोजीवजातस्यचीरंचिरंसर्वभोगानावहंतीआनयंती। वितन्वानासनातनी। विपूर्वात्तनोतेर्लटःशानच्। उविकरणंयणादेशः। विस्तारवतीत्यर्थः। विस्ता

SGDF
Sri Gargeshwari Digital Foundation

रश्चकालतोविवक्षितः । ममवासांसिगावश्चगाश्चअन्नपानेचकुर्वाणायतस्ततःस्वाहासुष्ठुआहूयतेवेदैःप्रतिपाद्यतइतिस्वाहेत्युक्तोगोविंदः। सुआइत्युपसर्गद्वयपूर्वकात्ह्वयतेःकर्मणिडाप्रत्ययेवलोपेचसतिस्वाहेतिसिद्धेःशब्दस्वाभाव्यादव्ययत्वं । लोमशां बहुकेशवतीं लोमादिपामादिपिच्छादिभ्यःशनेलचइतिमत्वर्थेशप्रत्ययः । सुशिखंडां । चतुष्कपर्दायुवतिरित्यादिश्रुतेः । चतुःशिखंडेतिश्रुत्यंतराच्च । एवंभूतांश्रियंपशुभिस्सहसदामेमयिआवहआनयेत्यर्थः ॥ १० ॥ अभ्यस्ताविद्याप्रवचनादधिकफला

आमायंतुब्रह्मचारिणःस्वाहा । विमायंतुब्रह्मचारिणःस्वाहा । प्रमायंतुब्रह्मचारिणःस्वाहा । दमायंतुब्रह्मचारिणःस्वाहा । शमायंतुब्रह्मचारिणःस्वाहा । यशोजनेसानिस्वाहा । श्रेयान्वस्यसोसानिस्वाहा । तंत्वाभगप्रविशानिस्वाहा । समाभगप्रविशस्वाहा । तस्मिन्त्सहस्रशाखे । निभगाहंत्वयिमृजेस्वाहा ॥ ११ ॥

(य)भवति । प्रवचनंचशिष्यसापेक्षं । अतःशिष्यसंपत्तयेकांचनविद्यामाह । आमेति । ब्रह्मचारिणोमामांआयंतु । तेकीदृशाः वि विविधाः । प्रप्रकृष्टाः । दमाःइंद्रियनिग्रहवंतः । अर्शआदिभ्योजितिमत्वर्थेचप्रत्ययः । शमाविष्णुनिष्ठावंतः ॥ शिष्या गत्यर्थयशोयशस्वी जनेजनेषु असानि । व्याख्यातायंगुरुरितिकीर्तिमान्भवानीत्यर्थः । अस्तेर्लोटिउत्तमपुरुषैकवचनमसानीति । स्वाहेत्युक्तार्थं । अभ्यासआदरार्थः । यशइत्यत्रमतुपोलुक्छांदसः । वस्यसःसुखस्यविषये । श्रेयान्प्रशस्ततरःश्रेष्ठोवाअ

सानि । अविरतसुखवान्त्स्यामित्यर्थः । तथात्वएवमनसोऽक्षोभेणनित्यंप्रवचनंभवति । नान्यथेत्यर्थः । हेभगषड्गुणपूर्ण तंब्रह्मकोशत्वादिगुणकंमयाप्रार्थितंचत्वात्वांप्रविशानि । हेभगसत्वंमामांप्रविश । भगवतिस्वस्यप्रवेशोक्तेःफलमाह । तस्मिन्निति । सहस्रशाखे । सहस्राणिशाखाइवशाखाःरूपाणियस्यतस्मिन्निितिबहुरूपतयासहस्रशाखपदोक्ते । तस्मिन्भगपदोक्तेत्वयिप्रविष्टोहंनिमृजेपापमितिशेषः । प्रक्षालये । त्वदुपासनादिनानिवृत्तकल्मषोमुक्तोभवानीतिभावः ॥११॥ शिष्यागमनमप्रयत्नेनास्त्वितिसदृष्टांतंप्रार्थयते । यथापइति । यथाप्रवताःनिम्नभूमीःप्रतिआपोयंति । अहर्जरं अहानिजीर्यंत्यत्रेत्यहर्जरं संवत्सरंप्रतियथा

यथापःप्रवतायंति । यथामासाअहर्जरं । एवंमांब्रह्मचारिणः । धातरायंतुसर्वतःस्वाहा । प्रतिवेशोसिप्रमाभाहिप्रमापद्यस्व ॥ १२ ॥ भूर्भुवःसुवरितिवाएतास्तिस्रोव्याहृतयः । तासामुहस्मैतांचतुर्थीं । माहाचमस्यःप्रवेदयते । महइति । तद्ब्रह्म । सआत्मा ॥ अंगान्यन्यादेवताः ॥ १३ ॥

मासायंति।एवंहेधातःमांब्रह्मचारिणःसर्वतआयंत्विति । प्रतिवेशोसिप्रवेष्टुंत्वंयोग्योसि । श्रमापनयनस्थानंआसन्नगृहंप्रतिवेशः तादृशोसीत्यर्थः । मांप्रतिप्रभाहिव्यक्तोभवमांप्रपद्यस्व । प्रामुहि । मयिसन्निहितोभवेत्यर्थः । भाष्येतुप्रमाणानुरोधेनामायंत्विितिविद्यांपूर्वलेशतोव्याख्यायपश्चादावहंतीतिविद्याव्याख्याता । तदनुरोधेनव्यासतीर्थटीकापितथैवप्रवृत्तेतिज्ञेयं ॥१२॥ वेदविद्याभ्यासार्थिनस्तत्प्राप्त्यर्थतत्पूर्वभाविनींव्याहृतिनिष्ठोपास्तिमाह । भूर्भुवःसुवरिति । इत्येतानिर्दिष्टाभूरित्यादित्रयःशब्दाः। व्या

हृतयःअनिरुद्धादिचतुरात्मनोविष्णोर्व्याहरणाद्वा व्याहृत्यर्थाऋगादयइतिवचनात् सर्ववेदोक्तसर्वस्वव्याहरणाद्वाविशेषेणाहरं तिविष्णुंभक्तंप्रतीतिवाव्याहृतयइत्युच्यंते । वैप्रसिद्धमेतत् । तासांव्याहृतीनांमहरित्येतांव्याहृतिंचतुर्थीं । माहाचमस्यःब्रह्माप्रवे दयते। स्वार्थेणिच् । प्रवेत्ति। भूरादिव्याहृतित्रयंजानन्नपिब्रह्मामहरितिव्याहृतिंचतुर्थतयाजानातीतिभावेनैतांचतुर्थीमाहाचम स्यःप्रवेदयतेमहइतिविशिष्योक्तिः। नतुभूरादिव्याहृतित्रयंनजानातीतिभावेनेतिज्ञेयं। प्रवेदयते । वरुणादीन्बोधयतीतिवार्थः। णिचश्चेत्यात्मनेपदं । उहस्मेतिनिपातसमुदायःप्रसिद्धिद्योतकः । केननिमित्तेनभूरादयश्चत्वारःशब्दाःविष्णुंव्याहरंतोव्याहृति शब्दवाच्याअभूवन्निितिचेदुच्यते। भुक्शुद्धिचिंतयोरितिकविकल्पद्रुमोक्तेः। चिंतार्थकस्यभूधातोःक्विपिज्ञानरूपत्वाद्भूः।भूबहा वितिच्छांदोग्यभाष्योक्तेः भूशब्दोबहुत्ववाचीवशब्दोवीर्यवाची भूःभूरिवःवीर्ययस्येतिव्युत्पत्तौभूशब्देह्रस्वत्वेसति भूरिवीर्यत्वा त्भुवइतिज्ञेयं वशब्दोबलवाची। तेनतत्कार्यमारब्धांतगामित्वंवीर्यलक्षयित्वाभूरिवीर्यत्वात्भुवइतिवाव्याख्येयं। सुवःसुष्ठुबलं यस्येतिविग्रहेणसुबलरूपत्वात्सुवः। पूर्णत्वान्महः। इत्यादिप्रवृत्तिनिमित्तेनविष्णोर्व्याहर्तृत्वात् भूरादेःव्याहृतिशब्दितत्वंध्येयं। उक्तंहिभूनामास्फूर्तिरूपत्वादित्यादि । स्थलांतरेच । भावनाच्चैवसुत्वाच्चेति । पूर्णोभूतिवरोनंतसुखइतिच । चमदित्यव्ययात् करोत्यर्थेअसप्रत्ययेअव्ययानांभमात्रेटिलोपइतिटिलोपेचमसइतिसिद्धेः । चमसशब्दस्यमहत्पदेनसमासेसतिमहाचमसशब्दे नातिचमत्कृतिमत्त्वात्व्याहृतिचतुष्टयप्रतिपाद्योवक्ष्यमाणदिशाषोडशात्माहरिरुच्यते । तंमहाचमसंजानातीत्यर्थेण्यप्रत्ययेआ दिवृद्धौयस्येतिपूर्वातलोपेमाहाचमस्योव्याहृत्यर्थविष्णुज्ञानीब्रह्मेतिध्येयं। भूरादिचतुष्टयेनव्याहृतंविष्णुरूपंकुतः । येनतेषांव्या

SGDF
Sri Gargeshwari Digital Foundation

हृतित्वमित्यतआह । तद्ब्रह्मेति । भूरादिचतुश्शब्दव्याहृतमनिरुद्धादिरूपचतुष्टयं ब्रह्म । गुणैर्बृंहितत्वाद्ब्रह्मेत्यर्थः । सचतुरात्माब्रह्मपदोक्तः आत्मा देवादीनांसर्वेषांस्वामी । अन्यादेवताब्रह्मादयःअंगानि गुणभूतानितत्परिवारभूतानीत्यर्थः। अंगावबद्धास्तुनशाखासुहिप्रतिवेदमित्युक्तेः।यद्वातद्ब्रह्मेत्यत्रतत्पदेनमहरितिचतुर्थव्याहृतिवाच्यं सन्निहितंविष्णुरूपंपरामृश्यतस्यब्रह्मेतिवासुदेवाख्यचतुर्थरूपत्वमुच्यते । ब्रह्मपंथाःसत्यंकर्मेतिक्रमेणवासुदेवाद्याश्चतस्रोमूर्तयइत्यैतरेयभाष्योक्तेः । वासुदेवोमहोनामेतीहैवोक्तेश्च सइतितस्यैवपरामर्शः । सवासुदेवःआत्मामध्यदेहः । अन्यादेवताअनिरुद्धप्रद्युम्नसंकर्षणरूपादेवताअंगानि

भूरितिवाअयंलोकः । भुवइत्यंतरिक्षं । सुवरित्यसौलोकः । महइत्यादित्यः । आदित्येनवावसर्वेलोकामहीयंते । भूरितिवाअग्निः । भुवइतिवायुः । सुवरित्यादित्यः । महइतिचंद्रमाः ।

शिरोबाहुपादरूपांगानीत्यर्थः । भूरित्येकवर्णप्रतिपाद्यमनिरुद्धरूपंशिरस्त्वेन । भुवइतिवर्णद्वयप्रतिपाद्यंप्रद्युम्नरूपद्वयंबाहुद्वयतयासुवरितिवर्णद्वयप्रतिपाद्यंसंकर्षणरूपद्वयंपादद्वयतयास्तीत्यर्थः । रूपाणांनस्थानतोपीतिन्यायेनाभेदेपिचत्वारइतिविशेषशक्त्यासंख्यामात्रविशेषेणान्यादेवताइत्यन्यत्वोक्तिरितिज्ञेयं । अंगांगित्वेनभगवान्क्रीडतेपुरुषोत्तमइतिसूत्रभाष्योक्तेः । अंगांगित्वेनभगवान्स्वानंदानुभवेस्थितः । सएवव्यूह्यचात्मानंपृथग्रूपइवस्थितइत्यैतरेयभाष्योक्तेश्च ॥१३॥ भूरादिशब्दचतुष्टयवाच्यरूपचतुष्टयस्यलोकज्योतिर्वेदप्राणाख्यवर्गचतुष्टयरूपस्थानान्याह। भूरित्यादिना। अयंलोकइति। समीपस्थत्वसर्वाधा

SGDF
Sri Gargeshwari Digital Foundation

रत्वहेतुभ्यामयंलोकइतिशब्दवाच्योभूलोकस्थोनिरुद्धः भूरित्युक्तानिरुद्धात्मावैअनिरुद्धानिरुद्धइतिप्रसिद्धइत्यर्थः। अंतरीक्षणीयत्वहेतुनांतरिक्षनामांतरिक्षस्थोनिरुद्धः। भुवःभुवइतिशब्दवाच्यप्रद्युम्नात्मा । सोयमनिरुद्धप्रद्युम्नःप्राणेस्थितत्वसर्वाधारत्वाभ्यांअसौलोकइत्युक्तोद्युलोकस्थोनिरुद्धःसुवरित्युच्यते । सुवश्शब्दवाच्यसंकर्षणात्मा । सोयमनिरुद्धसंकर्षणः । आदित्यः । अदितिसुतत्वहेतुनाआदित्यस्थआदित्यनामाऽनिरुद्धः । महरितिशब्दवाच्यवासुदेवात्मासोयमनिरुद्धवासुदेवइति । त

चं॒द्रम॑सा॒वावसर्वा॑णि॒ज्योती॑ꣳषि॒मही॑यंते । भूरिति॒वाऋच॑ः । भुव॒इति॒सामा॑नि । सुव॒रिति॒यजूꣳषि । मह॒इति॒ब्रह्म॑ । ब्रह्म॑णा॒वावसर्वे॑वे॒दामही॑यंते । भूरिति॒वैप्रा॒णः । भुव॒इत्य॑पा॒नः । सुव॒रिति॑व्या॒नः । मह॒इत्यन्नं॑ । अन्ने॑न॒वावसर्वे॑प्रा॒णामही॑यंते । तावाए॒ताश्चत॑स्रश्चतु॒र्धा । चत॑स्रश्चतस्रो॒व्याहृ॑तयः । तायोवेद॑ । सवे॑द॒ब्रह्म॑ । सर्व॑स्मैदे॒वाब॒लिमाव॑हंति ॥ १४ ॥

स्यमहिमानमाह। आदित्येनेति। आदित्येनमहरितिशब्दवाच्यवासुदेवात्मनास्थितेनअनिरुद्धवासुदेवाख्येनसर्वेलोकाःपृथिव्यादिलोकत्रयस्थाःअनिरुद्धानिरुद्धानिरुद्धप्रद्युम्नानिरुद्धसंकर्षणाख्यास्तिस्रोमूर्तयः सर्वेलोकाइत्युच्यमानामहीयंते । पूज्यंते । क्रीडयापूज्यपूजकभावेनवर्तंतइत्यर्थः । वावेतिकिलार्थेवस्तुतोनपूज्यपूजकभावकृतोच्चनीचत्वादीतिभावः । भूरितिवाअग्निरिति। अंगनेतृत्वादिनाग्निनामाग्निस्थःप्रद्युम्नःभूरित्युक्तानिरुद्धः । सोयंप्रद्युम्नानिरुद्धःवैप्रसिद्धः। वयबंधनइत्यतोवयतिबध्नाति

जगदितिवायुनामावायुस्थःप्रद्युम्नः । भुवःभुवःशब्दवाच्यप्रद्युम्नात्मा । सोयंप्रद्युम्नप्रद्युम्नः । आदित्यस्थःआदित्यनामाप्रद्युम्नः सुवरितिशब्दवाच्यसंकर्षणात्मासोयंप्रद्युम्नसंकर्षणः । आह्लादरूपत्वेनचंद्रमाः । तच्छब्दवाच्यःचंद्रस्थःप्रद्युम्नःमहरितिशब्दवाच्यवासुदेवात्मा। सोयंप्रद्युम्नवासुदेवः। चंद्रमसावावेतिपूर्ववज्ज्ञेयं। ऋचःअर्च्यत्वशब्दितपूज्यत्वहेतुनाऋङ्नामाऋक्स्थितःसंकर्षणःभूरितिव्याहृतिवाच्यानिरुद्धात्मा। सोयंसंकर्षणानिरुद्धः। समत्वहेतुनासामनामासामस्थितःसंकर्षणःभुवइतिशब्दोक्तप्रद्युम्नात्मा।सोयंसंकर्षणप्रद्युम्नः। याज्यस्वरूपतयायजुर्नामायजुषिस्थितःसंकर्षणःसुवरितिशब्दोक्तसंकर्षणात्मा । सोयंसंकर्षणसंकर्षणः। बृहत्त्वादखिलवेदाद्युक्तत्वहेतुनाब्रह्मनामाब्रह्मशब्दिताखिलवेदसमुदायस्थःसंकर्षणःमहरित्युक्तवासुदेवात्मा। सोयंसंकर्षणवासुदेवः। ब्रह्मणावावेतिप्राग्वत्। प्रकृष्टनयनहेतुनाप्राणनामाप्राणस्थोवासुदेवःभूरित्युक्तानिरुद्धात्मा सोयंवासुदेवानिरुद्धःवैप्रसिद्धः । अवाङ्नयनहेतुनाऽपाननामाअपानस्थःवासुदेवःभवइत्युक्तप्रद्युम्नात्मा । सोयंवासुदेवप्रद्युम्नइतिप्रसिद्धः । विविधनयनहेतुनाव्याननामाव्यानस्थितःवासुदेवःसुवरित्युक्तसंकर्षणात्मा सोयंवासुदेवसंकर्षणः । सर्वजीवोपजीव्यत्वरूपाद्यत्वहेतुनाअन्ननामाअन्नस्थोवासुदेवःमहरित्युक्तवासुदेवात्मा । सोयंवासुदेववासुदेवः । अन्नेनवावेतिप्राग्वत् । प्रागुक्तंबुध्यारोहायसंगृह्योक्त्वातदनुवादेनफलवत्तामाह । तावाएताइत्यादिना। ताःभूर्भुवःसुवरितिवाइत्यत्रनिर्दिष्टाएताभूरितिवायंलोकइत्यादिनालोकज्योतिर्वेदप्राणेषुप्रत्येकंचतुरात्मकस्थानेषूक्ताःचतस्रोव्याहृतयः । व्याहृतिशब्दवाच्यभूरादिशब्दवाच्यामूर्तयोनिरुद्धादयः । प्रत्येकमनिरुद्धादिभेदेनचतुर्धाभवंति । वैखल्विति । कियंत्योमूर्तयोजाताइत्यतआह । चतस्रश्चतस्रोव्या

SGDF Sri Gargeshwari Digital Foundation

हृतयइति। व्याहृतयः। व्याहृतिभिर्वाच्याभगवन्मूर्तयः। चतस्रश्चतस्रः। षोडशभवंति। ताःषोडशमूर्तीर्योवेद। ब्रह्मपदयोग्योयः कश्चिद्वेदउपास्तेसाक्षात्करोतिचसएवब्रह्मगुणबृंहितंविष्णुंवेद। विशेषतोजानाति। अस्मैमुक्तब्रह्मणेसर्वेमुक्तौस्थितादेवाःबलिं पूजांआवहंतिआहरंतीति। तथाचसूत्रं। प्रत्यक्षोपदेशादितिचेन्नाधिकारिकमंडलस्थोक्तेरिति ॥ १४ ॥ भूरादिव्याहृतिचतुष्टयवाच्यस्यअनिरुद्धादेर्देहेपिस्थानविशेषानुपास्त्यर्थमाह। सयएषइति। सःप्रसिद्धोयएषहृदयेंतराकाशःतस्मिन्नाकाशेअयंभूरित्युक्तःमनोमयःज्ञानप्रचुरःअमृतःनित्यःहिरण्मयःविलक्षणांनंदप्रचुरः। हिरुक्सुखंहिरण्यंस्यादितिस्मृतेः। पुरुषोनिरुद्धः

सयएषोंऽतर्हृदयआकाशः। तस्मिन्नयंपुरुषोमनोमयः। अमृतोहिरण्मयः। अंतरेणतालुके। यएषस्तनइवावलंबते। सेंद्रयोनिः। यत्रासौकेशांतोविवर्तते। व्यपोह्यशीर्षकपाले ॥ १५ ॥

वर्ततइत्याकृष्यते। तालुकेतालुकयोःअंतरेणमध्ये। यएषस्तनइवावलंबते। साइंद्रयोनिः। इंद्रस्यपरमेश्वरस्यप्रद्युम्नस्ययोनिःस्थानं। विधेययोन्यपेक्षयासेतिस्त्रीलिंगोक्तिः। यत्रासौकेशांतः। बहुव्रीहिः। केशमूलंतत्रेतिशेषः ॥ विअविभक्तिकोनिर्देशः। विःसुपर्णरूपःसंकर्षणोवर्तते। अशीर्षकपाले। शिरःकपालान्यदेशे। कपालादुपरीतियावत्। व्यपः व्यपइत्युक्तोवासुदेवोवर्तते हिप्रसिद्धमेतदिति। उपसर्गाहिधातुसंबंधेनतदर्थबोधादिहेतवः। केवलास्तुससाधनक्रियावाचिनोभवंतीति योव्यतींरफाणयदित्यत्रकर्मनिर्णयेटीकाकृदुक्तेः। व्यपगतवाचिव्यपशब्देउपपदेअस्तेःक्विपिअंतलोपेशकंध्वा

दित्वात्सररूपेव्यपइतिरूपसिद्धेः व्यपगतेपिजगतिस्थातेतिव्यपोवासुदेवोज्ञेयः ॥ १५ ॥ भूरादिव्याहृतिवाच्यानामनिरुद्धादी नामुपासनार्थंस्थानांतराण्याह । भूरित्यग्नावित्यादिना । प्रागुक्तनिरुक्त्याभूरित्युक्तोनिरुद्धोग्नौप्रतितिष्ठति । भुवइत्युक्तःप्र द्युम्नःवायौप्रतितिष्ठतीत्यनुषंगः । सुवरित्युक्तःसंकर्षणःआदित्ये महरित्युक्तोवासुदेवःब्रह्मणिचतुर्मुखेप्रतितिष्ठति । चतुर्मुख स्थोपिवासुदेवःनपरिच्छिन्नइत्याह । आप्नोतीति । स्वाराज्यंजगत्आप्नोतिव्याप्नोति । जगद्व्याप्यवर्ततइत्यर्थः । मनसस्पतिम

भूरित्यग्नौप्रतितिष्ठति । भुवइतिवायौ । सुवरित्यादित्ये । महइतिब्रह्मणि । आप्नोतिस्वाराज्यं ।
आप्नोतिमनसस्पतिं । वाक्पतिश्चक्षुष्पतिः । श्रोत्रपतिर्विज्ञानपतिः । एतत्ततोभवति ॥ १६ ॥
आकाशशरीरंब्रह्म । सत्यात्ममाणारामंमनआनंदं । शांतिसमृद्धममृतं । इतिप्राचीनयोग्योपास्व॥१७॥

निरुद्धंचाप्नोतीत्यर्थः । नित्यैश्वर्यबलात्स्वव्यापीजगद्व्यापीचयतस्ततः । वाक्पतिः । वाचिस्थितःवाङ्नियंता । चक्षुष्पतिः । श्रोत्रपतिःविज्ञानपतिरित्येतद्भवति । इत्येवंरूपएषभवतीत्यर्थः ॥ १६ ॥ वासुदेवस्यगुणानाह । आकाशशरीरमित्यादिना । ब्रह्मवासुदेवाख्यंब्रह्मआकाशशरीरं । आकाशवद्व्याप्तदेहं सत्यात्मसाधुगुणपूर्णं । सद्भावेसाधुभावेचेत्युक्तेःसच्छब्दपर्यायस त्यशब्दस्यसाधुगुणवाचित्वात् । प्राणारामंप्राणस्यवायोःआसमंताद्विशेषेणरामंरमकं रमतेर्ण्यतादच्प्रत्ययः । यद्वाप्राणश ब्दोबलवाची । बलात्मकत्वात्सुखात्मकत्वात्प्राणारामं । मनआनंदं । ज्ञानानंदात्मकं । सुखोन्नतिरूपत्वाच्छांत्यात्मकं स्वतः

पूर्तेःसमृद्धं । अमृतंदेहतोपिनित्यं । इत्येवंरूपेणहेप्राचीनयोग्यअधिकारिणांप्राथमिकयोग्यचतुर्मुखउपास्येतिप्राह भगवान्ऋषिर्विष्णुश्चतुर्मुखमितिज्ञेयं ॥ १७ ॥ वेदविद्याप्राप्त्यर्थंपूर्वभाविविद्यांतरमाह । पृथिवीत्यादिना । पृथिव्याद्यधिभूतपंचकत्रये प्राणाद्यध्यात्मपंचकत्रयेचक्रमान्नारायणा(द्यनिरुद्धांताः)दिवासुदेवांताःमूर्तयःपृथुत्वादिनिमित्तैःपृथिव्यादिषुस्थिताः पृथिव्यादिशब्दैःपंचभिःपंचभिरुच्यंतइतिज्ञेयं। इत्यधिभूतमिति भूतपंचकत्रयेस्थितानि(पंच)पंचरूपाण्युक्तानीत्यर्थः । तत्रात्मश

पृथिव्यंतरिक्षंद्यौर्दिशोवांतरदिशाः । अग्निर्वायुरादित्यश्चंद्रमानक्षत्राणि । आपओषधयोवनस्पतयआकाशआत्मा । इत्यधिभूतं । अथाध्यात्मं । प्राणोव्यानोपानउदानःसमानः । चक्षुःश्रोत्रं मनोवाक्त्वक् । चर्ममांसस्नावास्थिमज्जा । एतदधिविधायऋषिरवोचत् । पाङ्क्तंवाइदꣳ सर्वं । पाङ्क्तेनैवपाङ्क्तꣳस्पृणोतीति ॥ १८ ॥

ब्दोऽहंकारतत्वपरःभूताधिकारत्वात् । अथेत्यर्थांतरे(रं) । तदाह । अध्यात्ममिति । आत्मनिदेहेस्थितानिनारायणादिरूपाणिसाधिष्ठानान्युच्यंतइत्यर्थः । एतत्पृथिव्यादिपंचकषट्कंअधिविधायअधिकृत्यऋषिरादिऋषिर्विष्णुः इदंसर्वंपृथिव्यादिवर्गषट्कं पाङ्क्तंपंचत्वसंख्यायुक्तं वैखलु । पाङ्क्तेनपंचत्वसंख्यायुक्तेननारायणादिरूपेणैवपाङ्क्तंपंचत्वसंख्यायुक्तंपृथिव्यादिकंस्पृ

णोति । स्पृक्प्राणनइत्युक्तेःबलयतिस्वस्वव्यापारशक्तंकरोति । इत्यवोचदितियोजना ॥ १८ ॥ वेदविद्याभ्यासार्थिनः पूर्वभाविनींप्रणवविद्यामाह । ओमितिब्रह्मेति । ब्रह्मविष्णुःॐमित्युच्यते । अकारोकारौअधिकोच्चत्ववाचकौ । योग्यतया गुणानामन्वयः । अधिकोच्चगुणत्वहेतुनेतिभावः । नकेवलंमूलरूपीविष्णुरेवओंनामा । इदंसर्वंमत्स्यादिसर्वरूपजातंओमित्युच्यते । सर्वरूपाणांअधिकगुणपूर्णत्वादितिभावः । तथाचसूत्रं । नस्थानतोपिपरस्योभयलिंगंसर्वत्रहीति । कुतोविष्णोरोन्ना

ओमितिब्रह्म । ओमितीदꣳसर्वं । ओमित्येतदनुकृतिहस्मवाअप्योश्रावयेत्याश्रावयंति । ओमितिसामानिगायंति । ओꣳशोमितिशस्त्राणिशꣳसंति । ओमित्यध्वर्युःप्रतिगरंप्रतिगृणाति । ओमितिब्रह्माप्रसौति । ओमित्यग्निहोत्रमनुजानाति । ओमितिब्राह्मणःप्रवक्ष्यन्नाहब्रह्मोपाप्नवानीति । ब्रह्मैवोपाप्नोति ॥ १९ ॥

मत्वंज्ञायतइत्यतोविष्णुमुद्दिश्यकर्मादिकुर्वद्भिःनियमेनतदातदावोमित्युच्चार्यमाणत्वादितिभावेनाह । ओमित्येतदनुकृतीत्यादि । ओंअधिकोच्चहोतृस्थविष्णोश्रावयस्वमूलरूपंश्रावयेति आश्रावयंतिउच्चैरुच्चारयंति अध्वर्यवोहोतृस्थंहरिंप्रतीत्यर्थः । यदिहरिरोन्नामानस्यात्तदाध्वर्युःतथानब्रूयादितिभावः । ओश्रावयेतिवाक्येओंकारोनोपलभ्यतइत्यतउक्तं । ओमित्येतदनुकृतीति । एतदनुरूपंहस्मवै । ओइत्येतदोंकारानुकरणरूपंप्रसिद्धमित्यर्थः । अपिर्वक्ष्यमाणमंत्रसमुच्चये । ओमितिसामा

नीति । उद्गातृप्रस्तोतृप्रतिहर्तृसुब्रह्मण्याख्याश्चत्वारःउद्गातारः । ओमितिविष्णुमुद्दिश्यसामानिगायंति । ओंशोमिती ति । होतृमैत्रावरुणाच्छावाकग्रावसुतश्चेतिचत्वारोहोतृगणस्थाः ॐशोशावेति ओंअधिकोच्च शसुखरूप । ॐशअत्युच्च सुखविष्णोअवरक्ष । इत्युक्त्वाशस्त्राणिशंसंतीत्यर्थः । ओमितीति । ओथामोदेवेति ओअधिकोच्चधाममहाधाम । ओ देवसूच्चदेवेतिप्रतिगरंमंत्रंअध्वर्युःप्रतिगृणातिउच्चारयति । ओमितिविष्णुमुद्दिश्यब्रह्माब्रह्माख्यऋत्विक्प्रसौति । सोमम

ऋतंचस्वाध्यायप्रवचनेच । सत्यंचस्वाध्यायप्रवचनेच । तपश्चस्वाध्यायप्रवचनेच । द मश्चस्वाध्यायप्रवचनेच । शमश्चस्वाध्यायप्रवचनेच ॥ अग्नयश्चस्वाध्यायप्रवचनेच । अग्निहोत्रं चस्वाध्यायप्रवचनेच । अतिथयश्चस्वाध्यायप्रवचनेच । मानुषंचस्वाध्यायप्रवचनेच । प्रजाच स्वाध्यायप्रवचनेच । प्रजनश्चस्वाध्यायप्रवचनेच । प्रजातिश्चस्वाध्यायप्रवचनेच ॥ २० ॥

भिषुणोतीत्यर्थः । ओमित्यग्निहोत्रमिति । विष्णुःकर्मसांगंसफलंकरोत्वितिभावेनओमित्यग्निहोत्रादिकमनुजानाति । तत्कर्म कृतावनुज्ञांओमित्यनेनकरोतीत्यर्थः । ब्राह्मणःप्रवक्ष्यन्व्याकरिष्यन्स्वाध्यायाध्ययनादिकंकरिष्यन्ब्रह्मविष्णुंउपाप्नवानीति भावेनोमित्याहेत्यर्थः । तत्किंतदभिसंधिर्मृषाभवतिनेत्याह । ब्रह्मैवोपाप्नोतीति । एतच्चोपलक्षणं । यद्यध्वर्युप्रभृतयोप्युक्तज्ञा नपूर्वकंब्रह्मोपाप्नवानीत्यभिसंधिपूर्वकंमंत्रानुच्चारयेयुः । तदाब्रह्मप्राप्नुवंत्येवेत्यपिध्येयं ॥ १९ ॥ वेदाख्यब्रह्मविद्याकामस्यत

GDF
Sri Murugan Digital Foundation

त्प्राप्त्यर्थतत्पूर्वभाविनोयमनियमानाह । ऋतंचेत्यादिना । ऋतंयथार्थज्ञानं । स्वाध्यायोगुरूच्चारणानूच्चारणं । प्रवचनंव्याख्यानं । ऋतंचस्वाध्यायप्रवचनेचेत्यादीनिकर्तव्यानीतिसर्वत्रशेषः । सत्यंचेति । यथार्थज्ञानपूर्वकंवचनं । तत्पूर्वकंकरणंचेतिज्ञेयं । ध्यानंसत्यंपूज्यपूजाचतपः । दमइंद्रियनिग्रहः । शमःभगवन्निष्ठा । अग्नयःअग्नीनांआधानं । अग्निहोत्रंअग्निहोत्रानुष्ठानं । अतिथयः अतिथिपूजनं । मानुषंमनुष्यस्येदंमानुषं । देवादेरुत्तमस्यमनुष्यत्वेप्राप्तेज्ञानाद्यतिशयेसत्यपितदप्रकाशेनमनुष्यसंबंधिधर्मप्रदर्शनंमानुषमित्यर्थः । प्रजासुतोत्पत्तिः । प्रजननंतद्रक्षणं । प्रजातिःपित्रापुत्रस्यद्विजत्वसंस्कारे

सत्यमितिसत्यवचाराथीतरः । तपइतितपोनित्यःपौरुशिष्टिः । स्वाध्यायप्रवचनेएवेतिनाकोमौद्गल्यः । तद्धितपस्तद्धितपः ॥ २१ ॥

णप्रकृष्टजातिकरणं । सर्वकर्मकृतिकालेष्वपिस्वाध्यायप्रवचनयोःकर्तव्यताज्ञापनार्थसर्वत्रानुषंगः ॥ २० ॥ सत्यादीनांश्रेयस्साधनत्वंसममुतैकस्याधिकमित्यपेक्षायांमुनिमतोक्तिपूर्वकस्यचित्तदाह । सत्यमित्यादिना । सत्यवचाःसत्यवचनोराथीतरोनाममुनिः । सत्यंयथार्थज्ञानपूर्वकंवचनंकरणंचश्रेयइत्याह । तपइति । तपोनित्यःतपसिनित्यःतपःपरः । पौरुशिष्टिर्नामऋषिः ध्यानादिरूपंतपःश्रेयइत्याह । नाकोमौद्गल्यः । मुद्गलपुत्रोमौद्गल्यः । नाकोनाममुनिः । स्वाध्यायप्रवचनेएवश्रेयसीइत्याहेत्यर्थः । तत्राद्ययोस्समत्वेपितृतीयंमतमतिशयितमित्याह । तद्धितपस्तद्धितपइति । ऋतादेःसर्वस्यानयो

रेवांतर्भावादेतयोरेवानुष्ठानेसर्वंतेनकृतंभवत्येवेतिभावः । तदुक्तं । सम्यक्ज्ञात्वातुयोविष्णुंव्याख्यायीतजपेतवा । नतस्य किंचिदकृतंकर्तव्यंमुच्यतेचसइति ॥ २१ ॥ स्वाध्यायप्रवचनयोराधिक्यमित्युक्तेर्थेआख्यायिकामाह । अहमिति । वृक्षस्यसंसारवृक्षस्यैरिवाछेत्ता । रश्छेदनइत्यतोलिटिलिटःक्सुरितिक्सुस्वादेशेद्विर्वचनेएत्वाभ्यासलोपयोःस्वाद्युत्पत्तौउगित्वान्नुमिअत्त्वसंतस्येतिदीर्घैरेरिवेतिसिद्धेः । कीर्तिःमत्कीर्तिः । गिरेःपृष्ठमिवविस्तीर्णा । संसारनिवर्तनादिकंनमत्सामर्थ्यात् किंत्वीशप्रसादादितिभावेनोक्तं । ऊर्ध्वेत्यादि । ऊर्ध्वेनउत्कृष्टेनहरिणापवित्रःपावितोस्मि यतोतइतियोज्यं । किंचवा

अहंवृक्षस्यरेरिव । कीर्तिःपृष्ठंगिरेरिव । ऊर्ध्वपवित्रोवाजिनीवस्वमृतमस्मि । द्रविणꣳसवर्चसं । सुमेधाअमृतोक्षितः । इतित्रिशंकोर्वेदानुवचनं ॥ २२ ॥

जिनीवस्वमृतमस्मि । वाजीचासौअश्वरूपश्चासौनीश्चनेताचवाजिनीः । नयतेःक्विप् । वाजिन्यांसूर्येवसतीतिवाजिनी वसुः । वसतेरुः । सूर्यस्थोविष्णुः । तेनवाजिनीवसुनाअमृतंअमृतोस्मि । प्रारब्धकर्मनिर्मुक्तोस्मि । कथं । सुवर्चसं । शोभनकांतियुक्तं द्रविणंस्वर्णमिवजातोस्मिनित्यानंदस्वरूपत्वादितिभावः । व्याख्यातैषाश्रुतिःगीताभाष्यटीकायांपंचदशेध्यायेसुमेधाअस्मि । अमृतोक्षितः । अमृतेनहरिणाउक्षितः । उक्षसेचने । सिक्तः । अमृतेनव्याप्तोस्मीतियावत् । इतिएवंत्रिशंको

र्मानवस्यनृपस्यवेदानुवचनं । वेदव्याख्यानफलं ॥ २२ ॥ वेदश्रवणानंतरभाविनोयमनियमानाह । वेदमनूच्येत्यादिना । अनूच्यव्याख्याय । आचार्यःशिष्यमनुशास्तिशिक्षयति । अनुशासनप्रकारमेवाह । सत्यंवदेत्यादिना । स्वाध्यायान्माप्रमदः । प्रमादंमाकार्षीः । स्वाध्यायंमाविस्मार्षीरित्यर्थः । आचार्यायेष्टंधनमाहृत्यआनीयगुरुदक्षिणांदत्वातदनुज्ञातो

वेदमनूच्याचार्योंतेवासिनमनुशास्ति । सत्यंवद । धर्मंचर । स्वाध्यायान्माप्रमदः । आचार्याय प्रियंधनमाहृत्यप्रजातंतुंमाव्यवच्छेत्सीः । सत्यान्नप्रमदितव्यं । धर्मान्नप्रमदितव्यं । कुशलान्न प्रमदितव्यं । भूत्यैनप्रमदितव्यं । स्वाध्यायप्रवचनाभ्यांनप्रमदितव्यं । देवपितृकार्याभ्यांनप्रमदितव्यं । मातृदेवोभव । पितृदेवोभव । आचार्यदेवोभव । अतिथिदेवोभव । यान्यनवद्यानिकर्माणि । तानिसेवितव्यानि । नोइतराणि । यान्यस्माकꣳसुचरितानि । तानित्वयोपास्यानि । नोइतराणि । येकेचास्मच्छ्रेयाꣳसोब्राह्मणाः । तेषांत्वयासनेनप्रश्वसितव्यं । श्रद्धयादेयं । अश्रद्धयादेयं । श्रियादेयं । ह्रियादेयं । भियादेयं । संविदादेयं ॥ २३ ॥

ऽनुरूपदारानुद्वाह्यप्रजातंतुंप्रजासंतानंमाव्यवच्छेत्सीः । प्रजासंततेरविच्छित्तिःकार्या । आवश्यकत्वज्ञापनायसत्यादित्यादिपुनर्वचनं । कुशलात्श्रेयोहेतुव्यापारात् । भूत्यैभूत्यर्थंऐश्वर्यार्थं । न्यायोपायेनद्रव्यार्जनंकार्यमित्यर्थः । स्वाध्यायेत्यादि

SGDF Foundation

व्यक्तं । मातृदेवइत्यादेः मातापूज्यायस्यासौमातृदेवइत्यादिरर्थोज्ञेयः । अनवद्यानिअनिंदितानि । इतराणिसावद्यानि नोन कार्याणि । अस्मच्छ्रेयांसः । मत्तोपिश्रेष्ठाः । तेषांत्वयासनेन आसनादिना आसनाद्युपचारेणप्रश्वसितव्यं । प्रश्वासः

अथयदितेकर्मविचिकित्सावावृत्तविचिकित्सावास्यात् । येतत्रब्राह्मणाःसंमर्शिनः । युक्ताआयुक्ताः । अलूक्षाधर्मकामास्युः । यथातेतत्रवर्तेरन् । तथातत्रवर्तेथाः । अथाभ्याख्यातेषु । येतत्रब्राह्मणाःसंमर्शिनः । युक्ताआयुक्ताः । अलूक्षाधर्मकामास्युः । यथातेतेषुवर्तेरन् । तथातेषुवर्तेथाः । एषआदेशः । एषउपदेशः । एषावेदोपनिषत् । एतदनुशासनं । एवमुपासितव्यं । एवमुचैतदुपास्यं । शन्नोमित्रःशंवरुणः । शन्नोभवत्वर्यमा । शन्नइंद्रोबृहस्पतिः । शन्नोविष्णुरुरुक्रमः । नमोब्रह्मणे । नमस्तेवायो । त्वमेवप्रत्यक्षंब्रह्मासि । त्वामेवप्रत्यक्षंब्रह्मावादिषं । ऋतमवादिषं । सत्यमवादिषं । तन्मामावीत् । तद्वक्तारमावीत् । आवीन्मां । आवीद्वक्तारं । ॐशांतिःशांतिःशांतिः ॥ २४ ॥ इतिप्रथमवल्लीसंपूर्णा ॥ १ ॥

श्रमापनोदः । महात्मनामागमनेतच्छ्रमापनोदोयथातथाकर्तव्यमित्यर्थः । अश्रद्धयादेयमिति । अश्रद्धयापिदेयमेव । गुण भूतश्रद्धाभावेनप्रधानदानलोपोनकार्यइतिभावः । केचिददेयमितिपदंछिंदंतिश्रियादेयमिति । प्रसन्नेनमनसेत्यर्थः ॥ २३ ॥ अथे

त्यर्थांतरे । मांविहायदेशांतरंगतस्यतेयदिकर्मविचिकित्सा । यज्ञादिभगवदाराधनकर्मविषयेसंदेहः । वृत्तविचिकित्सा । कर्मांगाचारविषयेसंदेहःस्यात् । भवेत्तदेतिशेषः । संमर्शिनोविमर्शकारिणः । युक्तायोगयुक्ताः । आयुक्ताः । स्वधर्मानुष्ठानाग्रहयुक्ताः । अलूक्षाः अरूक्षाःप्रश्नेकृतेकोपरहिताः । धर्मकामाअदृष्टार्थिनः । तेमहात्मानःतत्रविचिकित्सितकर्मणिवृत्तेवायथावर्तेरन् । यथात्वमपिवर्तेथाः । अथेत्यर्थांतरे । अभ्याख्यातेषुनिंदितेषु । विचिकित्सास्यादितिवर्तते । येतत्रेत्यादि प्राग्वत् । एषआदेशःइयमाज्ञाहरेः । नकेवलमाज्ञा । किंतुएषउपदेशः । नायंयादृशतादृशउपदेशःअपितुएषावेदोपनिषत् ।

ॐ ॥ सहनाववतु । सहनौभुनक्तु । सहवीर्यंकरवावहै । तेजस्विनावधीतमस्तुमाविद्विषावहै । ॐ शांतिःशांतिःशांतिः ॥ १ ॥

वेदरहस्यमेतत्। एतदनुशासनं। शिक्षेत्यर्थः ।प्रागुक्तंसत्यत्वादिकंअवश्यमुपास्यमितिद्विरुक्त्यावधारयति । एवमिति । उपासितव्यंप्रागुक्तसत्यवचनादिकमवश्यानुष्ठेयमित्यर्थः । ययाशांत्याविद्योपक्रम्यसमापितातामेवविघ्ननिवृत्तौशक्तेतिभावेनांतेपि पठति। शन्नोमित्रइति । अत्रवायोत्वामेवप्रत्यक्षंब्रह्मावादिषमित्युक्तेर्बीजंतुउपक्रमएवोक्तं॥२४॥ प्रथमवल्लीसंपूर्णा ॥१॥ यस्याविद्यायाःपूर्वकर्तव्याविद्याउक्तातामेववक्तुंविघ्न(परिहारिणींशां)विघातिनींशांतिंपठति । सहनाविति । नौगुरुशिष्यौ अवतु । अवरक्षणगतिकांतिप्रवेशेत्यादिधातुपाठात् । प्रविशतु । आवयोःसन्निधीयतामित्यर्थः । नौसहैवभुनक्तु । पालयतु भुजपालना

भ्यवहारयोरितिधातोः । व्याख्यानविषये वीर्यसामर्थ्यसहकरवावहै । तेजस्विनौभवावेतियोज्यं । अधीतंफलप्रदमस्तु । नौआवाभ्यांअधीतंतेजस्व्यस्त्विवा । माविद्विषावहै । विद्याग्रहणनिमित्तंशिष्यस्यगुरोर्वाप्रमादकृतापराधात्प्राप्तंविद्वेषंनैवकरवावइत्यर्थः । त्रिःशांतिपाठस्यबीजमुक्तमेवध्येयं ॥ १ ॥ प्रधानब्रह्मविद्यामाह । ब्रह्मविदिति । ब्रह्मवित् परब्रह्मज्ञानी(परंब्रह्मेत्यन्वेति)परंब्रह्मप्राप्नोति । एतेनपरब्रह्मप्राप्तिकामःपरंब्रह्मविद्यादियुक्तंभवति । तत्रकिंलक्षणकंब्रह्म । कथंचतद्भेदनं । नहिब्रह्मपदेनप्रतीतस्यापरिच्छिन्नस्यसाक्षात्कारोयुक्तः । कीदृशीचतत्प्राप्तिः । याज्ञानसाध्या । सर्व

ॐब्रह्मविदाप्नोतिपरं । तदेषाभ्युक्ता । सत्यंज्ञानमनंतंब्रह्म । योवेदनिहितंगुहायांपरमेव्योमन् । सोश्नुतेसर्वान्कामान्सह । ब्रह्मणाविपश्चितेति ॥ २ ॥

गतत्वेननित्यप्राप्तत्वादित्युत्पन्नशंकात्रयस्यक्रमेणपरिहारार्थंप्रस्ताव्यमंत्रमुदाहरत्युपनिषत् । तदेषाभ्युक्तेत्यादिना । तदभि । तदाशंकात्रयंप्रतितत्समाध्यर्थमितियावत् । एषाऋक्उक्ताउच्यतइत्यर्थः । सत्यंज्ञानमनंतंब्रह्मेतिलक्षणशंकायाउत्तरं । प्रत्येकंलक्षणत्वात्त्रीणिलक्षणान्यवश्यंज्ञातव्यत्वादुक्तानि । सत्यत्वंनाम जगत्स्रष्टृत्वं । जगज्जीवनप्रदत्वंजगच्चेष्टकत्वं जगत्संहर्तृत्वंचेतिज्ञातव्यं । सदितिसद्भावःजन्मेतियावत् । सत्वंजीवनंप्रवर्तनंच । सत्वंविशरणंनाशमितियावत् । षदॢविशरणइतिधातोः । यापयतीतिव्युत्पत्त्यासत्यशब्देनार्थचतुष्टयस्यापिप्रतीतेः । ज्ञानत्वंतुस्वपरगताशेषसामान्यविशे

षविषयकज्ञानरूपत्वं । अनंतत्वंचदेशकालगुणापरिच्छिन्नत्वं । द्वितीयशंकोत्तरं । योवेदेति । अपरिच्छिन्नपरिमाणस्यापिस्वशक्त्याभक्तानुकंपयाऽल्पपरिमाणं अक्षरनयोक्तदिशाविद्यमानमेवप्रकटयत्सर्वजीवोपकारिका(यकर)र्यकारणप्रेरकतया तद्धृदयगुहावस्थितंयोवेदेत्यर्थः । तृतीयशंकोत्तरं । सोश्नुतइति । नसंयोगादिमात्रंतत्प्राप्तिः । येनज्ञानसाध्यानस्यात् । किंतुविपश्चितासर्वज्ञेनब्रह्मणा स्थलविशेषेअभिव्यक्ततयास्थितेनपरब्रह्मणा । विरिंचेनवा । सहसर्वान्स्वयोग्यान्कामान्भुंक्ते इतितेनसहतदधीनतयासुखभोगएवतत्प्राप्तिरितितदभिप्रायः । इतिशब्दस्यइत्येषाभ्युक्तेतिपूर्वेणान्वयः ॥ २ ॥ सत्यमित्यत्रस

तस्माद्वाएतस्मादात्मनआकाशःसंभूतः । आकाशाद्वायुः । वायोरग्निः । अग्नेरापः । अद्भ्यः पृथिवी । पृथिव्याओषधयः । ओषधीभ्योन्नं । अन्नात्पुरुषः ॥ ३ ॥

च्छब्दःसद्भावेसाधुभावेचेतिगीतोक्तेः सद्भावशब्देनप्रजननंसूचितमितिगीताभाष्योक्तेश्चप्रजननरूपसद्भाववाचीत्युपेत्यसद्भावं जन्मयापयतीति । यातेरंतर्णीतण्यर्थादातोनुपसर्गेकइतिकप्रत्ययेआतोलोपइटिचेत्याकारलोपेअयस्मयादीनीतिभसंज्ञायांअपदत्वेनजस्त्वाभावेसत्यमितिरूपमुपेत्यजगत्स्रष्टृत्वंसत्यपदेनोच्यतइत्ययुक्तंपंचमहाभूतानामेवजगत्कारणत्वादित्यतस्तेषामपिब्रह्मैवकारणं । तदंतर्गतंतत्सत्तादिप्रदंचेतिभावेनसत्यपदोक्तंजगत्कारणत्वंविवृणोति । तस्मादित्यादिना । तस्माद्ब्रह्मविदाप्नोति परमितिपरब्रह्मप्राप्तिकामेनज्ञातव्यतयोक्तादेतस्मात्सत्यत्वादिनालक्षितात् आत्मनआकाशःसंभूतःजातः । अत्रप्रकरणेआ

काशादिशब्दैः भूतंभूताभिमानीतद्देहस्तत्त्रितयांतर्गतोहरिश्चेतिचत्वारोग्राह्याः । हरेस्तत्त्रितयांतर्गतिश्चतत्सत्ताशक्त्यादिप्रदत्वेनेतिज्ञेयं । संभूतपदोक्तंजन्मचयथासंभवं हरेरभिव्यक्तिरभिमानिनोभिमानः तद्देहस्यभूतस्यचपरिणामइतिज्ञेयं । आकाशाच्चतुर्विधाच्चतुर्विधोवायुःसंभूतः । चतुर्विधाद्वायोश्चतुर्विधोग्निःसंभूतः । चतुर्विधादग्नेःचतुर्विधाआपःसंभूताः । चतुर्विधाभ्योऽद्भ्यःचतुर्विधापृथिवीसंभूता । चतुर्विधायाःपृथिव्याःचतुर्विधाओषधयःसंभूताः । चतुर्विधौषधीभ्यश्चतुर्विधमन्नं संभूतं । चतुर्विधान्नात्पुरुषशब्दितोदेहस्तदभिमानीजीवःतदुभयांतर्गतोहरिश्चेतित्रितयंसंभूतमितिज्ञेयं । तदाहसूत्रकारः ।

सवाएषपुरुषोन्नरसमयः । तस्येदमेवशिरः । अयंदक्षिणःपक्षः । अयमुत्तरःपक्षः । अयमात्मा । इदंपुच्छंप्रतिष्ठा ॥ ४ ॥

कारणत्वेनचाकाशादिषुयथाव्यपदिष्टोक्तेरिति । तेजोतस्तथाह्याहेतिच । तत्राद्यनयेआकाशाद्वायुरित्यादेः कल्पनोपदेशादितिन्यायेनमुख्यवृत्त्याभूतोत्पत्तिपरत्वं । अभिमानिनयन्यायेनअभिमानिपरत्वंचोपेत्यसमाकर्षन्यायेनपरममुख्यवृत्त्याआकाशादिपुरुषांतशब्दानांब्रह्मपरत्वंच द्युभ्वादिनयन्यायेनप्रादुर्भावंजनिंचोपेत्यकार्यत्वेसतिकारणत्वरूपावांतरकारणत्वसमर्थनात् । तेजोनयेतेजःपदोपलक्षिताशेषभूततदभिमानिनांउपादानशक्तिकर्तृत्वशक्त्यादेरीशायत्तत्वोक्तेः ॥ ३ ॥ एवंसत्यपदोक्तंजगज्जन्महेतुत्वंआत्मनइत्यादिप्रकरणेनसमर्थ्यअस्तिचैत्रइत्युक्तेजीवतीतिप्रतीतेः अस्तेःशत्रंतस्यसदितिरूपमुपेत्यसत्वंजी

वनंयापयतीतिषदृंविशरणगतीतिधातोर्भावेक्विबंतत्वमुपेत्यसद्गतिंविशीर्णत्वंचयापयतीतिचव्युत्पत्त्याश्रयेणउक्तमन्यदर्थत्रयं ज्ञानत्वानंतत्वरूपलक्षणद्वयंचविवरितुंपुरुषपदेनपरममुख्यवृत्त्योक्तस्यजीवदेहस्थस्यहरेःजीवदेहेपंचरूपतयास्थितिंवक्तुंप्रकरणांतरमारभते । सवाएषपुरुषइति । सआत्मनइतिसर्वभूतमूलकारणत्वेनोक्तः । वैप्रसिद्धः । एषआकाशादिपदैर्मुख्यवाच्यतयाप्रकृतः पुरुषःजीवदेहस्थःपुरुषनामाहरिःअन्नरसमयः । मयट्प्राचुर्यार्थः । तादात्म्यार्थेविकारार्थेप्राचुर्यार्थेमयट्त्रिधेत्युक्तेः । अन्नशब्दोत्रअद्यतेत्तिचेतिवाक्यशेषाददभक्षणइत्यतःकर्मणिकर्तरिवानिष्ठाप्रत्ययेरदाभ्यांनिष्ठातोनःइतिनिष्ठातकारस्यनत्वेअन्नमितिसिद्ध्याभूतोपजीव्यत्वरूपाद्यत्वभूतात्तृत्वरूपसंहर्तृत्वपरः । रसशब्दःसारवाची । रसःसारोवरश्चेतिशब्दाःपर्यायवाचकाइत्युक्तेः । तथाचान्नेषुअन्नशब्दार्थेषुरसःसारोन्नरसः तत्प्रचुरोन्नरसमयः । सर्वभूतोपजीव्यत्वेनसर्वभूतसंहर्तृत्वेनचनिमित्तेनान्नरसमयशब्दवाच्यः । प्राकृतान्नविकारदेहस्थोनिरुद्धइत्यर्थः । अन्नपदस्यप्राकृतान्नपरत्वनिवृत्त्यर्थंअन्नमयइत्यनुक्त्वाअन्नरसमयइत्युक्तं । एतेनसवाएषपुरुषःसर्वाद्यत्वसर्वात्तृत्वरूपसर्वोपजीव्यत्वसर्वसंहर्तृत्वाभ्यांनिमित्ताभ्यांअन्नरसमयइतिकथनेनसत्यपदस्यसर्वजीवनहेतुत्वसर्वसंहर्तृत्वरूपार्थद्वयमपिविवृतंध्येयं । अन्नमयकोशस्थस्यानिरुद्धस्यान्नरसमयशब्दवाच्यस्यशिरःप्रभृत्यवयवानांकोशशिरःप्रभृत्यवयवाएवस्थानानीत्याह । तस्येदमेवशिरइति । प्राकृतान्नविकारशरीरशिरएवतस्यशिरइत्यर्थः । दृश्यमानजीवदेहशिरोंतस्थत्वेनतदावृततयास्थितत्वाद्धरेःशिरसोवस्त्रप्रावृतजानुनिइदंजान्वितिनिर्देशवदुपचारेणायंनिर्देशः । एवमग्रेपिज्ञेयं । अयंदृश्यमानान्नविकारदेहसंबंधीदक्षिणःपक्षः । दक्षिणबाहुः ।

SGDF

अन्नरसमयस्यानिरुद्धस्यदक्षिणबाहुः तदंतरस्तीत्यर्थः । अयमुत्तरःपक्षः । परिदृश्यमानदेहसंबध्युत्तरःपक्षोवामबाहुः अन्नरसमयस्यानिरुद्धस्यवामबाहुः तदंतर्वर्ततइत्यर्थः । अयमात्मामध्यदेहःजीवदेहमध्यदेहःतस्यमध्यदेहः । इदंपुच्छं तस्यविवरणंप्रतिष्ठेति । प्रतितिष्ठत्याभ्यामितिप्रतिष्ठापादौ । सुपांसुलुगित्यादिनाद्विवचनस्याकारादेशः । जीवदेहपादयोरस्यपादौवर्ततेइत्यर्थः। अन्नविकारदेहः तदवयवाश्चानिरुद्धाधीनाइतिभावः ॥४॥ सत्यपदस्यजगज्जन्मस्थितिलयगतिहेतुत्वमर्थमुपेत्यजन्महेतु

तदप्येषश्लोकोभवति ॥ अन्नाद्वैप्रजाःप्रजायंते । याःकाश्चपृथिवीꣳश्रिताः । अथोअन्नेनैवजीवंति । अथैनदपियंत्यंततः । अन्नꣳहिभूतानांज्येष्ठं । तस्मात्सर्वौषधमुच्यते । सर्वंवैतेनन्नमाप्नुवंति । येन्नंब्रह्मोपासते । अन्नꣳहिभूतानांज्येष्ठं । तस्मात्सर्वौषधमुच्यते । अन्नाज्जूतानिजायंते । जातान्यन्नेनवर्धंते । अद्यतेत्तिचभूतानि । तस्मादन्नंतदुच्यतइति ॥ ५ ॥

त्वंआत्मनआकाशइत्यादिना अन्यदर्थद्वयंसवाएषइत्यादिनाचव्याख्यातं । तस्मिन्नर्थत्रयेश्लोकमुदाहरत्युपनिषत् । तदप्येषश्लोकइत्यादिना । तत्तत्र । उक्तेर्थेएषश्लोकोपिभवति । तमेवोदाहरति । अन्नाद्वाइत्यादिना । नामैकदेशेनामग्रहणं । अन्नरसमयाद्वाइत्यर्थः । भौतिकान्नविकारदेहस्थादन्नरसमयनामकादनिरुद्धात्प्रजाःदेहयोगेनजायंते । वैप्रसिद्धमेतत् । याःकाश्चपृथिवींश्रिताः ताःप्रजाइत्यर्थः । अथोजाताश्चप्रजाःअन्नरसमयेनजीवंति । प्राणान्बिभ्रति । अथपश्चादंततःप्रलयकालेएनत्अन्न

रसमयाख्यमनिरुद्धंअपियंति । इतराज्ञेयतयातदुदरंप्रविशंतीत्यर्थः । अन्नंहिअन्नरसमयनामानिरुद्धोहिभूतानांज्येष्ठंभूतेभ्योज्यायःहियस्मात्तस्मात्सर्वौषधमुच्यते । उषदाहइत्यतःकर्मणिघञिपुगंतेतिगुणेओषाःसंसारेदह्यमानाः । सर्वेचतेओषाश्चसर्वौषाःधीयंतेअस्मिन्निितिसर्वौषधं। संसारदग्धानामाश्रयः भवभयनिवर्तकमुच्यतइत्यर्थः। अन्नमयस्यब्रह्मत्वंजानतःफलमाह । सर्वंवाइति । येऽधिकारिणअन्नंअन्नरसमयाख्यमनिरुद्धंब्रह्मगुणपरिपूर्णमुपासते । तेवैतएवसर्वंपूर्णंअन्नरसमयंहरिंप्राप्नुवंतीति । उपसंहरति । अन्नंहिभूतानांज्येष्ठमिति । हियतोन्नरसमयोभूतेभ्योज्यायान् तस्मात्सर्वौषधमुच्यते । तात्पर्यार्थंवाअन्नं

तस्माद्वाएतस्मादन्नरसमयात् । अन्योंतरआत्मांप्राणमयः । तेनैषपूर्णः । सवाएषपुरुषविधएव । तस्यपुरुषविधतां । अन्वयंपुरुषविधः । तस्यप्राणएवशिरः । व्यानोदक्षिणःपक्षः । अपानउत्तरःपक्षः । आकाशआत्मा । पृथिवीपुच्छंप्रतिष्ठा ॥ ६ ॥

हीत्यादिपुनर्वचनं । अन्नशब्देनात्रनप्रसिद्धान्नमुच्यते । किंतुअलौकिकंवस्त्वितिभावेनतन्निर्वक्ति । अद्यतेतिचेति । भूतैरितिविपरिणामेनअनुषंगः । अद्यतेउपजीव्यते भूतान्यत्तिचसंहरति । संहारस्योर्णनाभिवदनरूपत्वादत्तीत्युक्तं । तस्मादद्यात्तृरूपत्वात्तद्रूपमन्नमुच्यतइत्यर्थः । इतिशब्दस्यइत्येषश्लोकइतिपूर्वेणान्वयः ॥ ५ ॥ इत्यन्नमयप्रकरणं ॥ ७ ॥ सत्यंज्ञानमितिलक्षणवाक्यस्थसत्यपदेनजगत्स्रष्टृत्वंजगज्जीवनदत्वंजगत्प्रवृत्तिरूपगतिहेतुत्वंसंहर्तृत्वंचेतिविवक्षितार्थचतुष्टयमध्येस्रष्टृत्वं

जीवनदत्वंसंहर्तृत्वंचेतित्रयंआकाशाद्युत्पत्तिप्रकरणेअन्नमयप्रकरणेचविवृतं । जगत्प्रवर्तकत्वरूपगतिहेतुत्वरूपमर्थंप्राग्विवृत
जीवनदत्वंचस्फुटंविवरितुंदेहस्थप्रद्युम्नाख्यरूपप्रतिपादनपरंप्रकरणांतरमारभते । तस्माद्वाएतस्मादित्यादिना । तस्मात्सत्य
त्वेनलक्षितात्एतस्मात्प्रकरणद्वयेनप्रतिपादितात्अन्नरसमयात् । प्राकृतान्नविकारदेहेनियंतृतयास्थितात्अन्नरसमयनामका
त्अनिरुद्धात्अन्यःअंतरःतदंतस्थःआत्मानियामकःप्राणमयःवायुविकारप्राणमयकोशस्थः । प्राणंदेवाअनुप्राणंतीति वाक्य
शेषोक्तदिशाप्राणंतिप्रवर्ततेजीवंतिवा बाहुल्येनभूतान्यनेनेतिव्युत्पत्त्याप्राणमयशब्दवाच्यःप्रद्युम्नाख्यस्तिष्ठतीत्यर्थः। तेनप्राण
मयेनप्राणमयकोशस्थेनप्रद्युम्नेनएषअन्नमयकोशस्थोन्नरसमयोनिरुद्धःनिःछिद्रतयापूर्णः । सवाएषपुरुषविधः । प्राणमयकोश

तदप्येषश्लोकोभवति ॥ प्राणंदेवाअनुप्राणंति । मनुष्याःपशवश्चये । प्राणोहिभूतानामायुः ।

स्थोप्राणमयनामाप्रद्युम्नःपुरुषविधएवपुरुषाकारएव । तस्यप्राणमयस्योक्तरूपप्रद्युम्नस्यपुरुषविधतामनुपुरुषाकारतानुसारेणअ
यंअन्नमयकोशस्थःतन्नामानिरुद्धःपुरुषाकारः । तस्मादुद्भूतइत्युपलक्षणतयाग्राह्यं । प्राणमयशब्दित(स्य)प्रद्युम्नस्यावयवानां
स्थानान्याह । तस्यप्राणएवशिरइत्यादिना । प्राण(स्थःप्र)स्थंप्रणेतृत्वेनप्राणनामकशिरइत्यर्थः । एवंव्यानस्थोविशेषेणअनिती
तिव्युत्पत्त्याव्यानाख्योदक्षिणबाहुरित्यर्थः। अपानितीतिव्युत्पत्त्याऽपानाख्योपानस्थःसव्यबाहुः। आकाशपृथिवीशब्दाभ्यां
उदानसमानौग्राह्यौ । तस्यप्राणमयाख्यप्रद्युम्नस्यमध्यदेहःउदाननामोदानस्थःपुच्छमिवांतिमतयास्थितौ । प्रतिष्ठाप्रतिष्ठौपा
दौसमाननामकौसमानस्थौ । प्राणमयकोशप्राणादयःप्रद्युम्नाधीनाइतिभावः ॥ ६ ॥ जगद्गतिजीवनयोर्हेतुत्वनिमित्तेनप्रा

णमयनामकःतन्नामकोशस्थइत्युक्तेर्थेश्लोकमुदाहरति । तदप्येषश्लोकोभवतीत्यादिना । तदपितत्रापि । उक्तेर्थइत्यर्थः । ये मनुष्याःपशवोदेवाश्च । प्राणंप्राणमयमनुप्राणंतिप्राणमयप्रेरणयाप्राणंतिचेष्टंते । हिताहितप्राप्तिपरिहारार्थंप्रवृत्तिमंतोभवंतिजीवंतिचेत्यर्थः । प्राणोहिप्राणमयोहिभूतानामायुः जीवनहेतुः । तस्माद्भूतानांजीवनहेतुत्वात्सर्वायुषमुच्यते । प्राणमयः सर्वायुषःउच्यतइतिविपरिणामः । प्राणमयज्ञानिनःफलमाह । सर्वमिति । येधिकारिणःप्राणमयकोशस्थंप्रागुक्तनिमित्तेनप्राणमयशब्दवाच्यंप्रद्युम्नं ब्रह्म देशकालगुणापरिच्छिन्नतयाब्रह्मपदवाच्यं उपासते जानंतिच । तेसर्वमेवआयु

तस्मात्सर्वायुषमुच्यते । सर्वमेवत्आयुर्यंति । येप्राणंब्रह्मोपासते । प्राणोहिभूतानामायुः । तस्मात्सर्वायुषमुच्यतइति । तस्यैषएवशारीरआत्मा। यःपूर्वस्य ॥ ७ ॥

र्मोक्षंयंति । उपसंहरति । प्राणोहीति । तात्पर्यार्थमभ्यासोवा । यद्वासर्वायुःप्रदत्वेहेतुकथनायपुनर्वचनं । इतिशब्दःइत्येषश्लोकइत्यन्वेति । प्राणमयप्रकरणसमाप्तौवा । यद्वाइतिशब्देनश्लोकंसमाप्यप्राणमयस्यधर्मांतरमाहोपनिषत् । तस्येति । तस्यान्नमयकोशस्थस्यतन्नामकानिरुद्धस्यएषप्राणमयकोशस्थः तन्नामाप्रद्युम्नः । शारीरआत्मादेहिरूपात्मा । अन्नमयाख्यकोशस्थमनिरुद्धंदेहवत्कृत्वातदंतस्थप्राणमयकोशस्थःप्रद्युम्नोदेहिवद्वर्ततइत्यर्थः । रूपयोरभेदेपिदेहदेहिभावान्यत्वांतरत्वादिकंअधिष्ठानभूतकोशयोःतथात्वातन्निष्ठरूपयोरपितथात्वंउपचरितंवा । भेदप्रतिनिधिविशेषेणैश्वर्यब

SGDF
Sri Gayathri Digital Foundation

लेनचमुख्यमेवेतिवाज्ञेयं । एवमग्रेपि । तस्यैषइत्यत्रतच्छब्दार्थंव्यनक्ति । यःपूर्वस्येति । पूर्वस्यान्नविकारकोशस्य । यअनिरुद्धः । शारीरात्मतयावर्तते अन्नविकारदेहंशरीरवत्कृ(त्वावर्त)त्वांतर्वर्ततेतस्यैवेति ॥७॥ इतिप्राणमयप्रकरणं ॥ ७ ॥ एवंलक्षणवाक्यस्थसप्तपदार्थप्रकरणत्रयेणविवृत्त्येदानींअखिलवस्तुगताखिलसामान्यविषयकत्वरूपंज्ञानत्वलक्षणंविवृणोति । तस्मादित्यादिना । तस्मान्मंत्रवर्णलक्षितात् । एतस्मात्प्राणमयप्रकरणेनव्याख्यातात्प्राणमयकोशस्थात्तन्नामकात्प्रद्युम्नात्अन्योंतरोऽतस्थःआत्माव्याप्तःमनोमयः । मनुअवबोधनइत्यतोसुन्प्रत्ययेमनसाज्ञानेनप्रचुरोमनोमयइतिव्युत्पत्त्याअशेषवस्तुगत

तस्माद्वाएतस्मात्प्राणमयात् । अन्योंतरआत्मामनोमयः । तेनैषपूर्णः । सवाएषपुरुषविधएव । तस्यपुरुषविधता । अन्वयंपुरुषविधः । तस्ययजुरेवशिरः । ऋग्दक्षिणःपक्षः । सामोत्तरःपक्षः । आदेशआत्मा । अथर्वांगिरसःपुच्छंप्रतिष्ठा ॥ ८ ॥

सामान्याकारगोचरज्ञानप्राचुर्यवत्त्वनिमित्तेनमनोमयनामकोमनोमयाख्यकोशस्थःसंकर्षणस्तिष्ठतीत्यर्थः । तेनमनोमयेनोक्तरूपेणसंकर्षणाख्येनएषप्राणमयकोशस्थःतन्नामाप्रद्युम्नःनिश्छिद्रतयापूर्णः । सवाएषमनोमयःसंकर्षणःपुरुषाकारएव । तस्यपुरुषाकारतांअनुसृत्यअयंप्राणमयःपुरुषाकारः । ततउद्भूतइत्यपिध्येयं । मनोमयस्थस्यतन्नाम्नःसंकर्षणस्यशिरआद्यवयवानांस्थानान्याह । तस्येत्यादिना । तस्यमनोमयकोशस्थस्यसंकर्षणस्यशिरःयजुःयज्ञहरणनिमित्तेनयजुर्नामकंयजु(स्थितं)स्संस्थितं ।

एवशब्दोयजुश्शब्दस्यमुख्यत्वार्थः । अर्चनस्वीकारहेतुनाऋङ्नामकःऋक्स्थःदक्षिणबाहुः दोषात्सम्यक्करणहेतुनासामनामासामस्थःउत्तरबाहुः । शतकोटितयातिविस्तृतत्वहेतुनाउपदेशत्वरूपहेतुनाचआदेशाख्यआदेशशब्दितपंचरात्रस्थोमध्यदेहः । अधरत्वांगिरसत्वहेतुभ्यांअथर्वांगिरसनामकौअथर्वांगिरसस्थौपुच्छंपुच्छमिवांत्यतयास्थितौ । प्रतिष्ठाप्रतिष्ठौपादौ । यजुरादिकं तस्यशिरःप्रभृत्येकैकावयवप्रतिपादकं नसाकल्येनतत्स्वरूपप्रतिपादनक्षममितितात्पर्यार्थः ॥८॥ यजुरादिभिःसाकल्येनाप्रतिपाद्यत्वरूपोक्तार्थेश्लोकंसंवादयन्तज्ज्ञानिनःफलंचाह । तदप्येषइति । तदपितत्रापि । पूर्वोक्तार्थेपीत्यर्थः । ब्रह्मणःमनोमयको

तदप्येषश्लोकोभवति । यतोवाचोनिवर्तंते । अप्राप्यमनसासह । आनंदंब्रह्मणोविद्वान् । नबिभितेकदाचनेति । तस्यैषएवशारीरआत्मा । यःपूर्वस्य ॥ ९ ॥

शस्थस्यतन्नामकस्यसंकर्षणरूपब्रह्मणःआनंदंभेदप्रतिनिधिविशेषात्ब्रह्मणइतिषष्ठीप्रयोगः । आनंदरूपंब्रह्मविद्वान् । कदाचनबिभेति । मुक्तोभवति । कथंविद्वान्भयहीनोभवतीत्यतोमनोवाचामगोचरत्वेनापरिच्छिन्नत्वेनेतिभावेनोक्तं । यतोवाचइत्यादि । इतिशब्दस्यइत्येषश्लोकइतिपूर्वेणान्वयः । मनोमयस्थितिप्रकारमाह । तस्येति । प्राणमयस्यप्रद्युम्नस्यएषमनोमयःसंकर्षणशारीरआत्मादेहिवत्तिष्ठतीत्यर्थः । पूर्वस्यान्नरसमयाख्यस्यानिरुद्धस्य । यःप्राणमयःप्रद्युम्नःशारीरआत्माभवत् । तस्यप्रद्युम्नस्ये

त्यर्थः ॥ ९ ॥ इतिमनोमयप्रकरणं ॥ ७ ॥ स्वपरगताशेषविशेषविषयकत्वरूपविज्ञानत्वमपिलक्षणवाक्यस्थज्ञानपदस्यार्थइति भावेनतद्विवृणोति । तस्माद्वाएतस्मादित्यादिना । प्राग्वद्व्याख्याध्येया । विशेषज्ञानप्राचुर्येणनिमित्तेनविज्ञानमयशब्दाभिधेयोविज्ञानमयकोशस्थोवासुदेवःतेनविज्ञानमयाख्येनवासुदेवेनएषमनोमयोनिश्छिद्रत्वेनपूर्णः। सवाइत्यादिप्राग्वत् । अन्वयंपुरुषविधइत्यनंतरंततउद्भूतइत्यपिग्राह्यं । तस्यावयवस्थानान्याह । तस्यश्रद्धैवेति । तस्यविज्ञानमयस्यवासुदेवस्यशिरःश्रुतिर्धर्तृ

तस्माद्वाएतस्मान्मनोमयात्। अन्योंतरआत्माविज्ञानमयः। तेनैषपूर्णः। सवाएषपुरुषविधएव। तस्यपुरुषविधतां। अन्वयंपुरुषविधः। तस्यश्रद्धैवशिरः। ऋतंदक्षिणःपक्षः। सत्यमुत्तरःपक्षः। योगआत्मा। महःपुच्छंप्रतिष्ठा ॥१०॥ तदप्येषश्लोकोभवति॥ विज्ञानंयज्ञंतनुते। कर्माणितनुतेपिच। विज्ञानंदेवाःसर्वे। ब्रह्मज्येष्ठमुपासते। विज्ञानंब्रह्मचेद्वेद। तस्माच्चेन्नप्रमाद्यति। शरीरेपाप्मनोहित्वा। सर्वान्कामान्त्समश्नुतइति। तस्यैषएवशारीरआत्मा। यःपूर्वस्यः ॥ ११ ॥

त्वयोगेनश्रद्धानामकंश्रद्धास्थं। एवकारार्थःप्राग्वत् । ज्ञानदातृत्वयोगेनऋतनामकःऋतस्थोदक्षिणबाहुः। सतांनियामकत्वहेतुनासत्यनामकःसत्यस्थःसव्यबाहुःसर्वलोकयुक्तत्वहेतुनायोगनामकोयोगस्थोमध्यदेहः । महनीयत्वतोमहर्नामकौपुच्छमिवांतिमौप्रतिष्ठाप्रतिष्ठौपादाविति। श्रद्धाऋतमित्यादि। विज्ञानमयाख्यवासुदेवाधीनमितितात्पर्यार्थः॥१०॥ तदेवश्लोकेनव्यनक्ति।

विज्ञानमिति । विज्ञानमयकोशगतःतन्नामावासुदेवःयज्ञंसमुदायाभिप्रायंयजमानऋत्विगादिषुसर्वत्रस्थित्वायज्ञान्तदंगकर्माण्यपिचतनुतइत्यर्थः। विज्ञानंविज्ञानमयंवासुदेवंब्रह्मगुणपूर्णंचेद्वेद वेदचेत्साक्षात्करोतिचेदित्यर्थः। तस्माद्ज्ञानात्नप्रमाद्यतिनविस्मरतिचइत्यर्थः। शेषंस्पष्टं। तस्यैषइत्यादिप्राग्वत् ॥११॥ इतिविज्ञानप्रकरणं ॥छ॥ देशकालगुणापरिच्छिन्नत्वरूपानंतत्वंलक्षणवाक्यस्थानंतपदस्यार्थइत्युक्तं । तत्कुतःप्रमाणात्प्रतिपत्तव्यमित्यतःपूर्णानंदत्वहेतुनेतिभावेनाह । तस्माद्वाइत्यादिना ।

तस्माद्वाएतस्माद्वि॑ज्ञान॒मयात् । अन्योंतरआत्मा॑नंद॒मयः॥ तेनैषपू॒र्णः । सवाएषपुरुषवि॑धए॒व । तस्यपुरु॑षवि॒धतां । अन्वयं॑पुरुष॒विधः । तस्यप्रिय॑मेव॒शिरः । मादोदक्षि॑णःप॒क्षः । प्रमोदउत्त॑रःप॒क्षः । आनं॑दआ॒त्मा । ब्रह्मपुच्छं॑प्रति॒ष्ठा । तदप्येषश्लो॑कोभ॒वति॥ अस॑न्ने॒वस॑भवति । अस॒द्ब्रह्मेति॒वेद॒चेत् । अस्तिब्रह्मेति॑चेद्वे॒द । संतमे॒नंततोवि॑दुरि॒ति । तस्यैषएवशारी॑रआत्मा । यः॑पूर्व॒स्य॥१२॥

प्राग्वद्व्याख्या । आनंदप्राचुर्यहेतुनाआनंदमयनामकःआनंदमयकोशस्थःनारायणस्तिष्ठतीत्यर्थः । तेनैषपूर्णइत्यादिप्राग्वत् । तदुद्भूतइत्यपिग्राह्यं । तस्यानंदमयनाम्नोनारायणस्यशिरःप्रियमेव । परैःप्राप्यत्वहेतुनाप्रियनामकं । उपकारजप्रियशब्दितसुखेस्थितं। मोदतइतिव्युत्पत्त्यामोदनामकोदक्षिणबाहुः। विषयजमोदनामकेसुखेतिष्ठतीत्यर्थः । प्रकर्षेणमोदतइतिव्युत्पत्त्याप्रमोदनामासव्यबाहुः । प्रकृष्टविषयजेप्रमोदनामकेसुखेतिष्ठतीत्यर्थः । अततत्वहेतुनाआत्मामध्यदेहः । स्वरूपानंदेऽस्तीत्य

SGDF
Sri Gargeshwari Digital Foundation

र्थः । सृष्ट्याजगद्गृंहणहेतुनाब्रह्मनामकौपुच्छमिवस्थितौप्रतिष्ठाप्रतिष्ठौपादौ । ब्रह्माख्यप्रधानवायौतिष्ठतइत्यर्थः । आनंदमय कोशःप्रियमोदादिसुखविशेषावायुश्चेत्येतेसर्वेआनंदमयस्थनारायणाधीनाइतितात्पर्यं । सूत्रभाष्येतुआनंदमयाख्योनारायणःपुनःनारायणादिरूपेणपंचधाभिन्नःशिरःप्रभृत्यात्मनातिष्ठतीत्युक्तं । ननुलक्षणवाक्योक्तसत्यत्वादिलक्षणानांअनेकरूपस्थतयाएकत्रैवाभावात्कथंतेषांलक्षणत्वमितिचेत् । रूपाणांअभेदात्सर्वरूपाणांप्रत्येकंसत्यत्वादिलक्षणवत्त्वेपिभेदप्रतिनिधिविशेषबलेनअदनप्राणनादितत्तद्गुणदातृत्वस्यव्यवस्थयाप्रकाशनान्नामभेदःपंचरूपत्वसंख्यादिकंचयुक्तमितिज्ञेयं । सवाएवपुरु

अथातोऽनुप्रश्नाः । उताविद्वान्मुंलोकंप्रेत्य । कश्चनगच्छती३ । आहोविद्वान्मुंलोकंप्रेत्य । कश्चित्समंश्नुता३उ॥१३

षइत्युपक्रम्यरूपपंचकनिरूपणेनसत्यत्वादिलक्षणानिविवृत्येदानींपंचरूपमपिब्रह्मनजीवाद्भिन्नमितिजानतांभिन्नमितिजानतांचोभयेषांफलभेदोक्त्याजीवान्यब्रह्मत्वंपंचानांश्लोकेनस्थापयति ॥ तदप्येषइति । पंचरूपंब्रह्मजीवान्यदित्यत्रार्थेपिश्लोकोप्यस्तीत्यर्थः । ब्रह्मजीवव्यतिरेकेणासत्नास्तीतिवेदचेत् । सोसन्नेव । दुःख्येवभवतीत्यर्थः । जीवादन्यद्ब्रह्मास्तीतिवेदचेत् । एनंसंतंसुखिनंमुक्तियोग्यंविदुरित्येषश्लोकइतीतिशब्दस्यान्वयः । सूत्रभाष्यादौतुआनंदयमात्रपरःश्लोकोव्याख्यातः । तस्यैषएवेत्यादिप्राग्वत् ॥ १२ ॥ इत्यानंदमयप्रकरणं ॥ ७ ॥ ब्रह्मविदाप्नोतिपरमित्युक्तौउत्पन्नशंकात्रयंमंत्रोदाहरणपूर्वकमंत्रोक्तलक्षणप्रपंचनेननिरस्यजीवान्यत्वेनतदनन्यत्वेनचज्ञानिनोमुक्तितमोरूपफलोक्तौअवसरप्राप्तंप्रष्टव्यमर्थंपृष्टवान्वरुणोब्रह्मा

णमित्याह । अथातोनुप्रश्नाइति । अथअवसरप्राप्ताःअतःप्रश्नबीजवत्त्वात्गुरुभूतब्रह्मोक्त्यनुसारिप्रश्नाःवरुणेनकृताइत्यर्थः । तदाह । उतेति । उताविद्वान्अविद्वानपियःकश्चनप्रेत्यामुंलोकंगच्छति । आहोविद्वान्प्रेत्यामुंलोकंगच्छतीत्यनुकर्षः । अयमेकःप्रश्नः । विद्वानित्यत्रापिकिंसर्वोपिगच्छतिकश्चिदेवेतिद्वितीयःप्रश्नः । सर्वोपीत्यत्रापिकिंसर्वोपिसम्यक्अश्नुतेप्राप्नोतिब्रह्मेतिशेषः । उतकश्चिदेवसमश्नुतेनसर्वोपीतितृतीयःप्रश्नः। इतिप्रश्नत्रयंध्येयं । प्रश्नाइतिबहुवचनानुरोधात्समाधिमाहब्रह्मा । उइतिअभ्युपगमवाच्ययमुकारः। सर्वोपिज्ञानीसम्यगश्नुतेकश्चिदेववासम्यगश्नुतइतिचरमप्रश्नानंतरं उइत्युक्त्याकश्चिदेवज्ञानीविरिंच

सोकामयत । बहुःस्यांप्रजायेयेति । सतपोतप्यत । सतपस्तप्त्वा । इदꣳसर्वमसृजत । यदिदंकिंच । तत्सृष्ट्वा । तदेवानुप्राविशत् । तदनुप्रविश्य । सच्चत्यच्चाभवत् । निरुक्तंचानिरुक्तंच । निलयनंचानिलयनंच । विज्ञानंचाविज्ञानंच । सत्यंचानृतंचसत्यमभवत् । यदिदंकिंच । तत्सत्यमित्याचक्षते॥१४॥

पदयोग्यःसमश्नुतइतिपक्षस्यांगीकारप्रतीत्याअज्ञानीनैवब्रह्माप्नोति । ज्ञानिनोखिलाःप्राप्नुवंतीत्यर्थस्यलाभात् । अन्यथाज्ञानीकश्चिदितिसमितिचविशेषणवैयर्थ्यापातात्॥१३॥एवंवरुणकृतचरमप्रश्नस्यसंक्षेपेणउइत्युभ्युपगमरूपेणसंक्षिप्योत्तरोक्त्याप्रश्नांतरोत्तरमपिलब्धमिहेत्यभिप्रेत्यभगवन्महिमज्ञान्येवमुच्यते । नाज्ञानी । तत्रापिसम्यक्कश्चिदितिसंक्षेपेणोक्तमर्थरसंह्येवायंलब्ध्वानंदीभवतीत्यादौविस्तरेणवक्तुंविष्णोःस्वातंत्र्यादिमहिमज्ञापनायसृष्टिंसृष्टेषुप्रवेशंचाह। सोकामयतेत्यादिना। सआत्मा प्रजाये

य। अंतर्णीतण्यर्थोयं। जगत्प्रजनयेय। जगत्सृजानि। तन्नियामकतयाचाहंबहुःस्यांबहुरूपःस्यां भवेयमितिअकामयत। ऐच्छदित्यर्थः। यद्वाप्रजायेयप्रादुर्भवानीत्यर्थः। सतपःआलोचनंअतप्यताकरोत्। जगत्सृष्ट्वातन्नियामकतयाबहुरूपोभवानीतिव्यचिंतयदित्यर्थः। सतपःतप्त्वापर्यालोच्ययदिदंकिंचजगदस्तितत्सर्वमसृजत।स्वोदरस्थंजगत्बहिर्निर्यापयामासेत्यर्थः।स्वोदराद्बहिर्निष्क्रामणरूपवात्सृष्टेःतज्जगत्सृष्ट्वातदेवानुतत्सृष्टमन्वेवप्राविशत्।प्रविश्यकिमभवदित्यतःसत्वादिगुणयोगेनसदादिपदवाच्यःसन्स्वसंबंधेनजगतोपिसदादिशब्दवाच्यतासंपादकोभवदित्याह। सच्चेत्यादिना। सीदत्यवसादयतीतिसत्। सन्नामासन् सन्नामकजगद्गतोभवदित्यर्थः। एवमग्रेपि। षद्लृविशरणगत्यवसादनेष्वित्यतोंतर्णीतण्यर्थात्क्विप्(तनोतिनि)ततोनियामकश्चेतित्यत्त्यन्नामासन्त्यन्नामकजगद्गतोभवत्। तनुविस्तारइत्यतोङ्विच्प्रत्ययःकर्तरि। याप्रापाणइत्यतोडत्प्रत्ययः। कर्मधारयः। जगतोनिरुक्तत्वप्रदत्वान्निरुक्तनामासन्निरुक्तवस्तुगतोभवत्। (अनंतत्वाद्धेतो)(अवाच्यत्व)निर्वक्तुमशक्यत्वहेतोरनिरुक्तनामासन् अनिरुक्तजगद्गतोभवत्। सर्वाधारत्वान्निलय(ननामासन्निलयनजगद्गतोभवत्। श्री)श्रीब्रह्मप्राणेभ्योन्यजगतोसाधुताप्रदत्वादनिलयननामासन्तन्नामक(जगद्गतो)वस्तुगतोभवत्। सर्वंजानातीतिविज्ञाननामासन् विज्ञा(नाख्यजगद्गतो)ननामकवस्तुगतोभवत्। जगतःअविज्ञप्तिदातृत्वादविज्ञाननामा(सन्)अविज्ञानाख्य(जगद्गतो)वस्तुगतोभवत्। साधुस्वरूपत्वात्सत्यनामा(सत्याख्यवस्तुगतो)सन्तन्नामकजगद्गतोभवत्। जगतोदौर्बल्यदातृत्वहेतुनाअनृतनामाअनृताख्यवस्तुगतोभवदित्यर्थः। अत्रत्यच्चानिरुक्तंनिलयनंविज्ञानमितिमहान्ब्रह्मोच्यते। सत्यमितिश्रीप्राणरूपंजगत्। सन्निरुक्तानिलयनाविज्ञानानृतशब्दै

SGDF
Sri Gangadhar Digital Foundation

स्तुप्रकृतिप्राणमहद्भ्योन्यज्जगदितिज्ञेयं । तत्सर्वत्रानुप्रविष्टंरूपंतद्दोषेणलिप्यतेकिंनेत्याहतत्सत्यमभवत् । साधुस्वरूपंनिर्दोष स्वरूपंसत् सत्यनामाभवदित्यर्थः । प्रकृत्यधिकरणानुव्याख्यानेतु । सत्वात्ततेर्वैदिकत्वात्सम्यग्वक्तुमशक्यतः । आश्रयत्वा त्स्वाश्रयत्वाज्ज्ञानत्वाद्दुर्विदत्वतः । सत्ततेर्यातनाचैवह्यप्राप्यत्वाच्चदुर्जनैः । नित्यसाधुगुणव्याप्तियंतृरूपत्वतःसदेतिप्रकारां तरेणार्थउक्तः । ननूक्तरीत्यावसादनादिनिमित्तेनसन्निरुक्तानिलयनाविज्ञानानृतशब्दवाच्यत्वेअवसादनांतवत्त्वाज्ञानादिदोषि तास्यादित्यतआह । यदिदंकिंचेति । यदिदंकिंचसन्निरुक्तादिशब्दार्थत्वमुक्तं तत्सर्वंसत्यंसाध्वेवेत्याचक्षतेवृद्धाइत्यर्थः । तदधी

तदप्येषश्लोकोभवति । असद्वाइदमग्रआसीत् । ततोवैसदजायत । तदात्मानꣳस्वयमकुरुत । तस्मात्तत्सुकृतमुच्यतइति । यद्वैतत्सुकृतंरसोवैसः । रसꣳह्येवायंलब्धानंदीभवति । कोह्येवान्यात्क:प्राण्यात् । यदेषआकाशआनंदोनस्यात् । एषह्येवानंदयाति ॥ १५ ॥

नत्वादितिन्यायेनअन्यगतावसादनादिकंप्रतिस्वातंत्र्यहेतुनातच्छब्दवाच्यत्वोक्तौदोषाभावादितिभावः॥१४॥ बहुःस्यामित्या त्मनोबहुरूपात्मनाभवनमुक्त्वाप्रद्युम्नरूपेणजगत्सृष्टिमुक्त्वासृष्टस्यसत्ताशक्त्यादिप्रेरणायरूपांतरेणप्रवेशंचोक्त्वाइदानींस्वरू पबहुभवनंश्लोकोक्त्याव्यनक्ति।तदप्येष(श्लोक)इति॥स्वरूपबहुभवनरूपेर्थेपीत्यर्थः। इदमग्रे।अस्यजगतोग्रेपूर्वं। असत्। नञ्पूर्व स्यगत्यर्थस्यसीदतेरूपं। तथाचानासाद्यत्वरूपाप्राप्यत्वहेतुनाअसन्नामानारायणोमूलरूपीआसीत्। वैप्रसिद्धं । ततोनारायणा

त्मुमुक्षुणाआसाद्यत्वरूपप्राप्यत्वहेतुनासन्नामावासुदेवोजायत। प्रादुरभवत्। तद्वासुदेवाख्यंरूपंआत्मानंस्वयंसंकर्षणप्रद्युम्नादिरूपेणाकुरुत। तस्मात्स्वात्मानंरूपांतरात्मत्वेनअकुरुतेतिहेतोःतद्वासुदेवाख्यंरूपंसुकृतमुच्यतइत्यर्थः। इतिशब्दस्यइत्येषश्लोकइत्यन्वयः। जगत्सृष्टितदनुप्रवेशस्वात्मबहुभवनानांप्रकरणं॥७॥ सन्नाम्नोमुमुक्षुसाध्यत्वंहेतूक्त्याव्यनक्ति। यद्वैतत्सुकृतंरसोवैसइति। यदेतत्सुकृतंसवासुदेवःरसोवैआनंदरूपोवै। हिर्हेतौ। ततएवअयंज्ञान्येवरसमेवेतिवा(आनंदरूपमेवल)लब्ध्वानंदीभवतिनान्यथेत्यर्थः। तावताकथमस्यानंदरूपत्वमित्यतोजगच्चेष्टकत्वयुक्त्यासाधयति। कोहीति। यत्यदिएषआकाशः। आदीप्तत्वहेतुनाआकाशनामा(भगवान्)आनंदोनस्यात्। सुख(स्व)रूपोनस्यात्। तर्हिजगन्नचेष्टयेदितिशेषः। चेष्टारूपप्रवृत्तिहेतूनांरा

यदाह्येवैषएतस्मिन्नदृश्येनात्म्येऽनिरुक्तेऽनिलयनेऽभयंप्रतिष्ठांविंदते । अथसोभयंगतोभवति ।

गद्वेषदुःखोद्रेकसुखोद्रेकरूपाणांचतुर्णांमध्येनिरनिष्ठोनिरवद्यइत्यादिश्रुत्याआद्यत्रयस्याभावनिश्चयेनसुखोद्रेकस्याप्यभावेजगत्प्रवृत्तिर्निर्हेतुकानोत्पद्येत । उत्पद्यतेच । अतोभवतिजगत्प्रवर्तकआनंदरूपइति । मास्त्वयंजगत्प्रवर्तकइत्यतआह । कोहीति । अयंचेन्नचेष्टयेत्तर्हिइतिशेषः । कोह्येवान्यात् । अनचेष्टायांचेष्टयेत् । कःप्राण्यात् । प्रकृष्टचेष्टांयज्ञदानादिप्रेरणांकुर्यात् । नकोपि । अतोजगन्निश्चेष्टमापद्येतेति । कार्यानुसारात्कारणस्यमहाप्रवृत्त्यामहानंदरूपोयमितिभावः । परेषांसुखहेतुत्वाच्चायंसुखोद्रिक्तइत्याह । एषह्येवानंदयातीति । अखिलमानंदयतिहियतोतश्चानंदरूपइति ॥ १५ ॥ ब्रह्मणः

पूर्णानं(दत्वोक्ति)दोक्तिप्रकरणं ॥ ७ ॥ ज्ञान्येवमुच्यतेनत्वज्ञइत्युपसंहरन्प्रतिष्ठितमेवज्ञानंमुक्तिहेतुरित्याह। यदाह्येवैषइति। तस्मादित्यादौयोज्यंहेत्वर्थोवाहिशब्दः। रसंलब्ध्वैवानंदीभवति तल्लब्धिश्चतन्महिमज्ञानादेवयस्माद्भवतितस्मात्। अदृश्येसाकल्येनज्ञानागोचरे। अनात्म्येआत्मनोजीवस्येमेगुणाआत्म्याःतद्रहिते जीवगुणहीने। आत्मैवात्म्यंस्वामी तद्रहितेवा। अनिरुक्तेसाकल्येननिर्वचनागोचरे। अनिलयने। अनन्याश्रयेएतस्मिन्हरौ अभयंयथाभवतितथाध्यानरूपांप्रतिष्ठांविंदतेलभते। अथानंतरंसउपासकःअभयंभगवंतंगतःप्राप्तोभवतिनाज्ञइत्यर्थः। नकेवलंसम्यग्ज्ञानाभावेपरप्राप्त्यभावः। विप(र्यय

यदाह्येवैषएतस्मिन्नुदरमंतरंकुरुते । अथतस्यभयंभवति । तत्वेवभयंविदुषोमन्वानस्य । तदप्येषश्लोकोभवति ॥ भीषास्माद्वातःपवते । भीषोदेतिसूर्यः । भीषास्मादग्निश्चेंद्रश्च । मृत्युर्धावतिपंचमइति ॥ १६ ॥

ज्ञा)रीतज्ञानेनान(र्थश्चे)र्थप्राप्तिश्चेत्याह। यदाह्येवैषइति। उदरंउत्उत्कृष्टःअःअकारवाच्योविष्णुःयेभ्योजीवेभ्यःतेउदाःजीवा विष्णुतोनीचाइत्यर्थः। मयूरव्यंसकादयश्चेतिसमासः। तेषुजीवेषुरमतइत्युदरं जीवेषुपरस्परंविद्यमानंअंतरंभेदं। एतस्मिन्विष्णौएषःज्ञान्यज्ञोवाकुरुते। मन्यतेभगवद्रूपाणामन्योन्यंमूलरूपस्यचभेदंजानीते। अथानंतरमेव। तस्यभयंभवतिकुतएवमेतावन्मात्रेणभयमित्यतोभगवतःसामर्थ्यमाह। तत्वेवेति। तदेवतु ब्रह्मविदुषःज्ञानिनःअमन्वानस्याज्ञानिनश्चेतिसर्वस्यभयंभयं

करंभवति । एतावान्विशेषः । विदुषोयावन्मुक्तिकिंचिद्भयकृत्पश्चादभयकृत् । अज्ञस्यसंसारभयकृत् । विपरीतज्ञस्यतुमहाभयकृदिति । विदुषोपिभयकृदित्युक्तेर्थेश्लोकंप्रमाणयति । तदपीति । तत्रोक्तार्थेएषश्लोकोपिभवतीत्यर्थः । अस्मात्अस्यब्रह्मणःभीषाभयेनवातःपवते । भीषोदेतीत्यत्राप्यस्मादित्यन्वेति । अग्निःपचनादिव्यापारंकरोति । इंद्रःत्रैलोक्यपालनवर्षणादिव्यापारंकरोतीतिचयोज्यं । पंचमोमृत्युःयमोपिस्वव्यापारकरणायधावति । भीषास्मादित्यनुषंगः । एतच्चोपलक्षणं । सर्वेपिदेवादयःअस्यभयेनैवस्वस्वव्यापारान्कुर्वंतीत्यपिध्येयं । इत्येषश्लोकइतिइतिपदस्यान्वयः ॥ १६ ॥ ब्रह्मणोभयाभय

सैषानंदस्यमीमांसाभवति । युवास्यात्साधुयुवाध्यायकः । आशिष्ठोदृढिष्ठोबलिष्ठः । तस्येयंपृथिवीसर्वावित्तस्यपूर्णास्यात् । सएकोमानुषआनंदः। तेयेशतंमानुषाआनंदाः । सएकोमनुष्यगंधर्वाणामानंदः ॥ १७ ॥

(कृत्वमहिमोक्ति)कर्तृत्वोक्तिप्रकरणं ॥ ७ ॥ पूर्वंज्ञानिनःसर्वेपिमुच्यंतेतत्रापिकश्चिदेवसम्यगितिउकारेणसंक्षिप्योत्तरमुक्तं । तदिदानींविदुषामुक्तंभयकर्तृत्वंआमुक्त्येवेतिज्ञापयितुंविवृणोति । सैषानंदस्यमीमांसाभवतीत्यादिना । यद्वाब्रह्मणोयज्जगच्चेष्टकत्वादिनापूर्णानंदत्वमुक्तं । तज्ज्ञानिनांमुक्तानांचसुखतारम्योक्तिपूर्वंविवृणोति । सैषेति । एषह्येवानंदयातीत्यानंदयितृत्वमुक्तं । तन्मुक्तावेवमुख्यमिति तत्रसर्वेषांकिमेकधानैकधेतिविचारोभवति । एवंविचारेअनेकधेत्युच्यते । तत्रमानुषोत्तम

GDF
Sri Ganesha Digital Foundation

मारभ्यविरिंचिपर्यंतं आनंदतारतम्यंवक्तुंमनुष्योत्तमचक्रवर्त्यानंदंपूर्वावधिभूतंवक्तुंमुक्तचक्रवर्तिनोविशेषणान्याह। युवास्यादित्यादिना । युवा युमिश्रणे कर्मणिक्विप् । वातेःकनिन् । युश्चासौवाचयुवाविष्णुनासहगच्छतीतियुवा । प्राज्ञेनात्मनाऽन्वारूढउत्सर्जद्यातीतिश्रुतेः । साधुभिःगुणैर्युक्तत्वात्साधुयुवा । साधुपदोपपदाद्युमिश्रणइत्यतोवा युजेर्वाक्कनिप् । जलोपःछांदसः । अनुव्याख्यानेतुयुवानित्यतरुणः । साधुनाविष्णुनायुतःसाधुयुवेत्युक्तं । आध्यायकःआङ्ध्युपसर्गद्वयपूर्वकादिङ्ध्यनइत्यतोण्वुल्प्रत्ययेअकादेशेवृध्यायादेशयोर्निष्पत्तेः । सम्यगध्ययनकर्तेत्यर्थः । सम्यक्त्वंचमुक्त्याख्याध्ययनफलवत्त्वं । आसमंतात्शमस्येत्याशः । अतिशयेनआशःआशिष्ठःनित्यपूर्णसुखवानित्यर्थः अतिशयेनदृढोदृढिष्ठः । रक्तोहलादेर्लघोरिति

श्रोत्रियस्यचाकामहतस्य । तेयेशतंमनुष्यगंधर्वाणांमानंदाः । सएकोदेवगंधर्वाणांमानंदः ।

रभावाभावःछांदसः । अतिशयेनबलीबलिष्ठः । युवास्यादित्यादेःयदिमुक्तःस्यादित्यर्थः । तस्यैवंरूपविशेषणयुक्तस्यमुक्तचक्रवर्तिनःत्रेतायुगेसंसारदशायांइयंसर्वापृथिवीवित्तस्यवित्तेनपूर्णास्यात् । तदातस्ययत्सुखं । सएकोमानुषआनंदः । मनुष्यमुक्तचक्रवर्तिसंबंधीएकआनंदइत्यर्थः । तेप्रसिद्धाःयेशतंमानुषामनुष्यमुक्तचक्रवर्तिसंबंधिनःआनंदाःसएकोमनुष्यगंधर्वाणांमुक्तानामानंदइत्यर्थः ॥ १७ ॥ मुक्तत्वज्ञापनायविशेषणद्वयमाह । श्रोत्रियस्येति । श्रोत्रियाणामकामहतानांचेतिवचनव्यत्ययेनयोज्यं । एवमग्रेपिसर्वत्रविशेषणद्वयस्यवचनव्यत्ययेनपूर्वोक्तसामानाधिकरण्यंध्येयं । यद्यप्येकवचनचशब्दयोःस्वारस्यानुरोधेनपूर्वोक्तबहुवचनांतवाक्यंसंसारिपरं । उत्तरमेकवचनांतोपेतवाक्यंमुक्तपरमितिभिन्नविषयंवाक्यद्वयमितिव्याख्यानंस्व

GDF

रसं । तथैवज्ञानपादेसुधानुव्याख्यानयोःबृहद्भाष्येचामुक्तादमुक्तस्यमुक्तान्मुक्तस्यतारतम्यमाहेत्युक्तं । तथापिपरैस्सर्वममुक्त विषयतयैवव्याख्यातमितितद्युदासायैकविषयत्वेपिमुक्तपरत्वमेवयुक्तं । तल्लिंगानांश्रोत्रियत्वाकामहतत्वादीनांश्रवणादित्य भ्युपेत्यवादेनेतिसुधायामेवोक्तमस्यतात्पर्यं । येसाक्षादेवप्रेष्याःतेदेवगंधर्वाःतेषांमनुष्यगंधर्वापेक्षयाशतगुणोत्कृष्टआनंदइत्य त्यर्थः । एवमग्रेपि । पूर्वपूर्वेभ्यःउत्तरोत्तरंशतगुणोत्कर्षोध्येयः । चिरलोकेति । चिरकालीनोलोकः सएवलोकोयेषांतेचिरलो

श्रोत्रियस्यचाकामहतस्य । तेयेशतंदेवगंधर्वाणामानंदाः । सएकःपितॄणांचिरलोकलोकानां मानंदः । श्रोत्रियस्यचाकामहतस्य । तेयेशतंपितॄणांचिरलोकलोकानांमानंदाः। सएकआजान जानांदेवानांमानंदः । श्रोत्रियस्यचाकामहतस्य । तेयेशतमाजानजानांदेवानांमानंदाः । सएकःकर्मदेवानांदेवानांमानंदः ॥ १८ ॥ येकर्मणादेवानपियंति । श्रोत्रियस्यचाकाम हतस्य । तेयेशतंकर्मदेवानांदेवानांमानंदाः । सएकोदेवानांमानंदः । श्रोत्रियस्यचाकामहतस्य।

कलोकाः तेषांपितॄणामित्यर्थः । देवेष्वनाख्याताअकथितायादेवताःदेवकुलेजाताःतेआजानदेवाःतेषामित्यर्थः ॥ १८ ॥ केते कर्मदेवाःकुतश्चकर्मदेवत्वंतेषामित्यतउक्तं । येकर्मणेत्यादि । येबल्यादयः । कर्मणामध्येदेवान्देवत्वंअपियंतिप्राप्नुवंति तेकर्म देवाइत्यर्थः। देवानामिति । सृष्ट्यादौदेवत्वंप्राप्तानांतत्वाभिमानिदेवानामित्यर्थः । इंद्रस्येति । इंदुंरावयतीतिव्युत्पत्त्यादक्षप्रजे

श्वरस्येत्यर्थः। बृहस्पतेरिति । महेंद्रत्वहतुनाबृंहश्चासौपतिश्चेतिबृहस्पतिशब्दितपुरंदरस्येत्यर्थः ॥१९॥ प्रजापतेरिति । प्रजनने शितृत्वहेतुनाप्रजापतिनाम्नोरुद्रस्येत्यर्थः। ब्रह्मणइति । चतुर्मुखस्येत्यर्थः। अत्रआनंदनीचोच्चतोक्तिरुपलक्षणंज्ञानभक्तिबलादा

तेयेशतंदेवानामानंदाः । सएकइंद्रस्यानंदः । श्रोत्रियस्यचाकामहतस्य । तेयेशतमिंद्रस्यानं दाः । सएकोबृहस्पतेरानंदः । श्रोत्रियस्यचाकामहतस्य । तेयेशतंबृहस्पतेरानंदाः ॥ १९ ॥ सएकःप्रजापतेरानंदः । श्रोयिस्यचाकामहतस्य । तेयेशतंप्रजापतेरानंदाः । सएकोब्रह्मणआ नंदः । श्रोत्रियस्यचाकामहतस्य ॥ २० ॥ सयश्चायंपुरुषे । यश्चासावादित्ये । सएकः । सयए वंवित् । अस्माल्लोकात्प्रेत्य । एतमन्नमयमात्मानमुपसंक्रामति । एतंप्राणमयमात्मानमुपसंक्रा मति । एतंमनोमयमात्मानमुपसंक्रामति । एतंविज्ञानमयमात्मानमुपसंक्रामति । एतमा नंदमयमात्मानमुपसंक्रामति ॥ २१ ॥

वपिध्येयं ॥२०॥ एवंलक्षणवाक्यस्थसत्यादिपदत्रयार्थमात्मनआकाशइत्यादिप्रकरणषट्केनविवृत्य योवेदनिहितंगुहायामित्युक्त वेदनंकथमित्यतोनजीवैक्येन किंुततोभेदेनेतिअसद्ब्रह्मेतिश्लोकेनोक्त्वा अथातोनुप्रश्नाःइत्यादिनासोश्नुतइत्युक्तोज्ञानिनःसर्व

SGDF

कामभोगःसर्वज्ञानिनांसमानउतकस्यचिदेवसम्यगितिकृतप्रश्नस्यसैषानंदस्येत्यादिनोत्तरमुक्त्वाअथेदानींब्रह्मज्ञानंनतद्रूपादौभेदेनेत्युदरमंतरंकुरुतइत्यादिनाभिहितेकथंतर्हीत्यतःसर्वत्रस्थितभगवद्रूपाणामभेदेनैवजीवादिभ्योभेदेनैवचज्ञानंपुमर्थहेतुर्नान्यथेतिभावेनाह । सयश्चायमिति । रसंह्येवायंलब्ध्वानंदीभवतीत्यत्रयत्प्रसादात्स्वरूपानंदावाप्तिःब्रह्मादीनामुक्ता सप्रसिद्धःयो

तदप्येषश्लोकोभवति ॥ यतोवाचोनिवर्तंते । अप्राप्यमनसासह । आनंदंब्रह्मणोविद्वान् । न बिभेतिकुतश्चनेति । एतꣳहवावनंतपति । किमहꣳसाधुनाकरवं । किमहंपापमकरवमिति । सयएवंविद्वानेतेआत्मानꣳस्पृणुते । उभेह्येवैषएतेआत्मानꣳस्पृणुते । यएवंवेद । इत्युपनिषत् ॥ ॐ ॥ सहनाववतु । सहनौभुनक्तु । सहवीर्यंकरवावहै । तेजस्विनावधीतमस्तुमाविद्विषावहै ॥ ॐशांतिःशांतिःशांतिः ॥ २२ ॥ इतिद्वितीयवल्लीसंपूर्णा ॥ २ ॥

यंपुरुषेसर्वनृजीवसमूहे यश्चासौआदित्यपदोपलक्षितदेवेषुस्थितः सएकएवासर्वैःस्वातंत्र्यादिगुणैःविशिष्टःसर्वोत्तमःयोधिकारी। एवंवित्जानन् । जीवांश्चतारतम्येनचवित् । सअस्मालोकात्भौतिकदेहात्प्रेत्यतंदेहंत्यक्त्वानिर्गत्य । एतमन्नमयमात्मानंअनिरुद्धमुपसंक्रामतिप्राप्नोति । एवंप्रद्युम्नादीनिप्राणमयादिशब्दितान्यपिरूपाणिप्राप्नोतीत्यर्थः ॥ २१ ॥ पूर्णानंदत्वेनापित

GDF
Sri Gangadharan Digital Foundation

ज्ज्ञानमावश्यकमानंदमयप्राप्तावितिभावेनाह । तदप्येषइति । पूर्णानंदत्वज्ञानिनएवतत्प्राप्तिरित्यर्थेश्लोकोप्यस्तीत्यर्थः । यतोयस्मात्ब्रह्मानंदतोवाचोवचनानि मनसासहनिवर्तंते । अप्राप्यसाकल्येनाविषयीकृत्यब्रह्मणआनंत्यहेतुनावाङ्मनसागोचरमानंदंविद्वान् । कुतश्चननबिभेति । मुक्तोभवतीत्यर्थः । ज्ञानिनोपिपूर्वार्जितपुण्यपापरूपकर्मसत्वात्कथंब्रह्मप्राप्तिरित्यत आह । एत ꣳहवावनतपतीति । अहंकिंसाधुपुण्यंनाकरवं । नकृतवान् । पापंवाकिमकरवमित्येवंरूपेणपश्चात्तापेन । एतंज्ञानिनं । कर्मनतपति । तापकरंनभवतीत्यर्थः । वावेत्यधारणे नैवेति । अतएवोक्तंपूर्वश्लोके । कुतश्चननबिभेतीति । कुतोनेत्य

ॐसहनाववतु । सहनौभुनक्तु । सहवीर्यंकरवावहै । तेजस्विनावधीतमस्तुमाविद्विषावहै ।
ॐशांतिःशांतिःशांतिः ॥ ॐभृगुर्वैवारुणिः । वरुणंपितरमुपससार । अधीहिभगवोब्रह्मेति ।

तआह । सयइति । यआत्मानंपरमात्मानंएवमुक्तरीत्याविद्वान्जानन्नास्ते । सएतेपुण्यपापेस्पृणुतेजहाति । प्रियाप्रियेषुनृष्वितिशेषः । सुहृदःसाधुकृत्यांद्विषंतःपापकृत्यामित्यादेः। तदेवपुनराह । उभेइति । यआत्मानंएवमपरिच्छेद्यानंदादिस्वरूपत्वेनवेद एषज्ञानीउभेएतेपुण्यपापेस्पृणुतेजहाति हियतोतस्तस्यकर्मकृततापोनेति। यद्वा। यएवंवेदज्ञानिनःपुण्यपापत्यागात्तत्कृततापोनास्तीतिवेद । एषोपि । पुण्यपापेआत्मानंआत्मनःस्पृणुतेजहातीति । उपसंहरति । इत्युपनिषत्रहस्यमुक्तमिति॥७॥ ययाशांत्याब्रह्मविद्योपक्रम्यसमापितातामंतेपि प्रचयसिध्यर्थंपठति । सहनाविति ॥२२॥ इतिब्रह्मवल्यर्थसंग्रहः ॥७॥ ब्रह्मवल्युक्तार्थेसंवादित

याकांचनाख्ययिकांप्रागुक्तशांतिपठनपूर्वकमाह । सहनावित्यादिना । वारुणिःवरुणस्यापत्यंभृगुःवरुणंपितरमुपससार । उपसादितवान् । किमिति । अधीहिअध्यापय । भगवःभगवन् । मतुवसोरुसंबुद्धौछंदसीतिभगवइतिसाधु । ब्रह्मोपदिशेत्युपसत्तिमागादित्यर्थः । तस्मैभृगवेवरुणएतत्वक्ष्यमाणंरूपाष्टकंप्रोवाच । तदाह । अन्नमिति । अन्नमयंप्राणमयंचक्षुर्मयंश्रोत्रमयंमनोमयंवाङ्मयंविज्ञानमयंआनंदमयंचेत्येवं नामैकदेशेनामग्रहणन्यायेनायंनिर्देशोध्येयः । विज्ञानमयानंदमयावप्युपलक्ष्यौ । एतेनब्रह्मवल्यांपंचरूपोक्तिरुपलक्षणं । चक्षुर्मयश्रोत्रमयवाङ्मयाअपिग्राह्याइत्युक्तंभवति । तथाह्युक्तंवाधूलशाखायां । तस्माद्वाए

तस्मा॑एतत्प्रो॑वाच । अन्नं॑प्रा॑णंचक्षु॒ष्श्रो॒त्रं॑मनो॒वाच॒मिति॑ । तꣳहो॑वाच । यतो॑वा इ॒मानि॒भूता॑नि॒ जाय॑ंते । येन॒जाता॑नि॒जीव॑ंति । यत्प्रय॑ंत्य॒भिसं॑विश॑ंति । तद्वि॑जिज्ञासस्व । तद्ब्रह्मे॑ति ॥ १ ॥

तस्मादन्नरसमयात् । अन्योंतरआत्मावाङ्मयः । तस्माद्वाएतस्माद्वाङ्मयात्अन्योंतरआत्माचक्षुर्मयः । तस्माद्वाएतस्माच्चक्षुर्मयात् । अन्योंतरआत्माश्रोत्रमयः । तस्मात्प्राणमयः । तस्मान्मनोमयः । तस्माद्विज्ञानमयः । तस्मादानंदमयइति । भगवत्यन्नमयादेर्निरुक्तिःप्राग्वज्ज्ञेया । चक्षुर्मयत्वादेस्तुपूर्णदर्शनशक्तित्वाच्चक्षुर्मयइतीरितइत्यैतरेयभाष्योक्तरीत्यापूर्णदर्शनशक्तित्वपूर्णश्रवणशक्तित्वपूर्णवक्तृत्वशक्तिकत्वरूपावा । चक्षुःसचष्टेयद्विष्णुरित्येतद्भाष्योक्तदिशावानिरुक्तिर्ध्येया । कुतएतद्भूपाष्टकस्यब्रह्मत्वमित्यतोब्रह्मप्रश्नोत्तरत्वेनैवसिद्धेपिब्रह्मत्वेब्रह्मलक्षणमप्येष्वस्तीत्याह । तँहोवाचयतोवाइति । यत्प्रयंतिप्रलये ।

यदभिस्वेच्छयासंविशंतिमुक्तौ । तद्विजिज्ञासस्व । तद्विषयकश्रवणमननानिदिध्यासनरूपजिज्ञासांकुरु । कुतः । तद्ब्रह्मअत (तद्विजिज्ञासस्वेत्यु)इत्युवाचेतिपूर्वेणान्वयः ॥ १ ॥ ततःकिंजातमित्यतआह । सतपइति । एवमुपदिष्टोभृगुः । तपआलोचनंअतप्यतअकरोत् । सतपस्तप्त्वा । आलोचनंकृत्वाअन्नंअन्नमयमनिरुद्धंब्रह्मेतिव्यजानात् । साक्षात्कृतवान् । कथमित्यतोजगज्जन्मादिकर्तृत्वरूपगुरूपदिष्टलक्षणवत्त्वेनेत्याह । अन्नाद्ध्येवेति । अन्नमयादेवहीति । पुनःकिमकरोदित्यतोद्वितीय

सतपो॑तप्यत । सतप॑स्तप्त्वा ॥ अन्नं॑ब्रह्मे॒ति॒व्य॑जानात् । अन्ना॒ध्ये॑वख॒ल्वि॒मानि॒भूता॑नि॒जाय॑ंते । अन्ने॑न॒जता॑नि॒जीव॑ंति । अन्नं॑प्रय॑ंत्य॒भिसं॑वि॒श॑ंती॒ति । तद्वि॒ज्ञाय॑ । पुन॑रे॒ववरु॑ण॒पि॑त॒र॒मुप॑ससा र । अधी॑हि॒भगवो॒ब्रह्मे॑ति । तꣳहो॑वाच । तप॑सा॒ब्रह्म॒विजि॑ज्ञासस्व ॥ २ ॥ तपो॒ब्रह्मे॑ति । सतपो॑तप्यत । सतप॑स्तप्त्वा ॥ प्रा॒णो॒ब्रह्मे॒ति॒व्य॑जानात् । प्रा॒णा॒ध्ये॑वख॒ल्वि॒मानि॒भूता॑नि॒जाय॑ंते ।

रूपमपिसाक्षात्कर्तुंगुर्वनुज्ञार्थंपुनर्गुरुमुपसाद्यानुज्ञामादायतपःशब्दितमालोचनंकृत्वाप्राणमयाख्यंद्वितीयंप्रद्युम्नरूपंअपरोक्षीकृतवानित्याह । तद्विज्ञायेत्यादिना । अधीहीति । अनुज्ञांदेहीत्यर्थः । अनुजानीहीत्येववाच्येअंतर्णीतण्यर्थतयाधीहीत्युक्तिःविनयप्रदर्शनाय । भगवःभगवन्ब्रह्मप्राणमयाख्यंरूपंध्यानेनसाक्षात्कर्तुमितिशेषः । तपसाज्ञातानुसंधानरूपालोचनेन ॥ २ ॥ तपोब्रह्मेति । ज्ञानरूपंब्रह्मेत्यर्थः । तपसोब्रह्मज्ञानहेतुत्वात्तपोब्रह्मेत्यभेदोपचारइतिग्रंथांतरे । अत्रप्राणंप्रयंतिप्रा

णमभिसंविशंतीत्यर्थः । एवमन्नप्राणप्रकरणद्वयानंतरंतद्विज्ञायपुनरेववरुणंपितरमुपससार । अधीहिभगवोब्रह्मेति । तंहो

प्राणेनजातानिजीवंति । प्राणंप्रयंत्यभिसंविशंतीति । तद्विज्ञाय । पुनरेववरुणंपितरमुप ससार । अधीहिभगवोब्रह्मेति । तꣳहोवाच । तपसाब्रह्मविजिज्ञासस्व । तपोब्रह्मेति । सतपो तप्यत । सतपस्तप्त्वा ॥ मनोब्रह्मेतिव्यजानात् । मनसोह्येवखल्विमानिभूतानिजायंते । मनसा जातानिजीवंति । मनःप्रयंत्यभिसंविशंतीति । तद्विज्ञाय । पुनरेववरुणंपितरमुपससार । अ धीहिभगवोब्रह्मेति । तꣳहोवाच । तपसाब्रह्मविजिज्ञासस्व । तपोब्रह्मेति । सतपोतप्यत । सत पस्तप्त्वा ॥ विज्ञानंब्रह्मेतिव्यजानात् । विज्ञानाद्ध्येवखल्विमानिभूतानिजायंते । विज्ञानेनजा तानिजीवंति । विज्ञानंप्रयंत्यभिसंविशंतीति । तद्विज्ञाय । पुनरेववरुणंपितरमुपससार । अधी हिभगवोब्रह्मेति । तꣳहोवाच । तपसाब्रह्मविजिज्ञासस्व । तपोब्रह्मेति । सतपोतप्यत । सतप स्तप्त्वा । आनंदोब्रह्मेतिव्यजानात् । आनंदाद्ध्येवखल्विमानिभूतानिजायंते । आनंदेनजाता निजीवंति । आनंदंप्रयंत्यभिसंविशंतीति ॥ ३ ॥

वाचतपसाब्रह्मविजिज्ञासस्व । तपोब्रह्मेति । सतपोतप्यत । सतपस्तप्त्वाचक्षुर्ब्रह्मेतिव्यजानात् । चक्षुषोह्येवखल्विमानिभू

तानिजायंतेइत्यादिरूपेणचक्षुर्मयश्रोत्रमयवाङ्मयप्रकरणानियथोद्देशंध्येयानि । त्रीणिरूपाणिकानीत्याकांक्षायांप्राज्ञैरुपदेष्टव्यानि मनःप्रभृतिशब्दितसंकर्षणादिरूपत्रयपरतयाप्रकरणत्रयमपिव्याख्येयं ॥ ३ ॥ अत्रान्नादौसर्वत्राब्रह्मणिब्रह्मत्वमुपास्त्यर्थमुक्तमितिभ्रमनिरासायाह । सैषेति । भार्गवीभृगुणानुशिष्टा । वारुणीवरुणेनोपदिष्टा । सैषाअन्नंप्राणमित्यादिनोक्ताविद्यापरमेव्योमन्व्योम्निअच्छेद्यत्वादिनाव्योमनिभेहरौप्रतिष्ठिता । तत्परेतियावत् । ब्रह्मप्रश्नोत्त(रत्वात्)रात् । ब्रह्मलक्षणात् । ब्रह्मशब्दाभ्यासात् । तपसापरोक्षीकृतत्वलिंगाच्चेतिभावः । सुपांसुलुगित्यादिनासप्तम्यालुकिनङिसंबुध्योरिति

सैषाभार्गवीवारुणीविद्या । परमेव्योमन्प्रतिष्ठिता । यएवंवेदप्रतितिष्ठति । अन्नवानन्नादोभवति । महान्भवतिप्रजयापशुभिर्ब्रह्मवर्चसेन । महान्कीर्त्या ॥ ४ ॥ अन्नंनिंद्यात् । तद्व्रतं । प्राणो वाअन्नं । शरीरमन्नादं । प्राणेशरीरंप्रतिष्ठितं । शरीरेप्राणःप्रतिष्ठितः । तदेतदन्नमन्नेप्रतिष्ठितं ।

नलोपाभावेव्योमन्नितिसाधु । अन्नादिरूपाष्टकस्यब्रह्मत्वज्ञानिनःफलमाह । यएवंवेदेत्यादिना । योधिकारीएवमुक्तरूपाष्टकं जगज्जन्मादिहेतुत्वलक्षणयुक्तंब्रह्मत्वेनवेदसइतिशेषः । प्रतितिष्ठति मुक्तस्सन्हरौप्रतिष्ठितोभवति । अन्नवान्रक्षकत्वेनान्ननामकविष्णुमान् । तद्रक्ष्यइतियावत् । अन्नादः । अन्ननामकंहरिंअत्तिउपजीवतीत्यन्नादः । प्रजयाशिष्यप्रजयापशुभिः ब्रह्मवर्चसेनचमहान्भवति । कीर्त्याचमहान्भवतीत्यर्थः ॥ ४ ॥ अन्नवानन्नादइतिप्रकृतान्नाख्यभगवन्निष्ठाबह्वीःविद्याःव्रत

पूर्वमाह । अन्नमित्यादिना । अन्नंभगवंतंननिंद्यात् । तद्व्रतं । ज्ञानिनःसुखेप्सोःव्रतमित्यर्थः । प्राणःदेहस्थप्राणगतःप्राणनामाहरिः । अन्नंवै । अन्ननामकोवै । शरीरंशरोजीवःतंईरयतिप्रेरयतीतिशरीरंजीवप्रेरकंजीवस्थंरूपं । अन्नादंअन्नाख्यरूपानुभवितृ । शरीरं । अन्नं । प्राणोन्नादइत्यपियोज्यं । द्वयोरप्यन्नत्वमन्नादत्वंचव्यनक्ति । प्राणइति । प्राणेप्राणस्थेप्राणाख्यरूपे शरीरंशरीराख्यंजीवनियंतृरूपंप्रतिष्ठितं । शरीरेशरीराख्येरूपेप्राणःप्राणाख्योहरिःप्रतिष्ठितः । आन्योन्यान्नत्वमन्योन्यप्रति

सयएतदन्नमन्नेप्रतिष्ठितंवेदप्रतितिष्ठति । अन्नवानन्नादोभवति । महान्भवतिप्रजयापशुभिर्ब्रह्मवर्चसेन । महान्कीर्त्या । अन्नंनपरिचक्षीत । तद्व्रतं ॥ ५ ॥ आपोवाअन्नं । ज्योतिरन्नादं । अप्सुज्योतिःप्रतिष्ठितं । ज्योतिष्यापःप्रतिष्ठिताः । तदेतदन्नमन्नेप्रतिष्ठितं । सयएतदन्नमन्नेप्रतिष्ठितंवेदप्रतितिष्ठति । अन्नवानन्नादोभवति । महान्भवतिप्रजयापशुभिर्ब्रह्मवर्चसेन ।

ष्ठितत्वत्वं । उक्तमुपसंहरति । तदेतदन्नमन्नेप्रतिष्ठितमिति । तदेतद्रूपद्वयंअन्योन्यमन्नमन्नेप्रतिष्ठितंचेति । अन्योन्यभोग्यभोक्तृत्वशब्दितमन्योन्यप्रतिष्ठितत्वंलीलयाहरेर्युक्तमितिभावः । तात्पर्यद्योतनायतज्ज्ञानिनःफलमाह । सयइति । सइत्यस्यप्रतितिष्ठतीत्यादावन्वयः व्याख्यानंप्राग्वत् । अन्नंनपरिचक्षीत । अन्नाख्यभगवत्परिवर्जनंनकार्यं । तद्व्रतं । वक्ष्यमाणब्रह्मज्ञानिनइत्यर्थः ॥ ५ ॥ आपोवान्नमित्यादेःप्राग्वद्योजनाध्याहारः । अप्स्वित्यादेःअन्नत्वादिविवृतिपरत्वंअबादिपदानांतन्निष्ठ

भगवद्रूपपरत्वंचप्राग्वद्व्याख्येयं । एवमग्रेपि । अन्नंबहुकुर्वीतेति । महदितितत्रबहुमानबुद्धिःकार्या । तद्गुणान्तत्कर्माणिवा बहुकुर्वीत । बहुगुणकर्मवत्वेनअन्ननामकंप्रतिपादयेदितियावत् ॥ ६ ॥ नकंचनवसताविति । विद्यार्थित्वेनआगतस्यवसतौ वासविषयेकंचनकमपिनप्रत्याचक्षीत । प्रत्याख्यानंनकार्यमित्यर्थः । तस्माज्ज्ञातस्यान्नस्यप्रतिष्ठाहेतुत्वात् । ययाकयाचविध

महान्कीर्त्या । अन्नंबहुकुर्वीत । तद्व्रतं । पृथिवीवाअन्नं । आकाशोन्नादः । पृथिव्यामाकाशःप्रतिष्ठितः । आकाशेपृथिवीप्रतिष्ठिता । तदेतदन्नमन्नेप्रतिष्ठितं । सयएतदन्नमन्नेप्रतिष्ठितंवेदप्रतितिष्ठति । अन्नवानन्नादोभवति । महान्भवतिप्रजयापशुभिर्ब्रह्मवर्चसेन । महान्कीर्त्या ॥ ६ ॥ नकंचनवसतौप्रत्याचक्षीत । तद्व्रतं । तस्माद्ययाकयाचविधयावह्वन्नंप्राप्नुयात् । अराध्यस्माअन्नमित्याचक्षते । एतद्वैमुखतोन्नꣳराद्धं । मुखतोस्माअन्नꣳराध्यते । एतद्वैमध्यतोन्नꣳराद्धं । मध्यतोस्माअन्नꣳराध्यते । एतद्वाअंततोन्नꣳराद्धं । अंततोस्माअन्नꣳराध्यते । यएवंवेद ॥ ७ ॥

यायेनकेनापिविधिनाअन्नंबहुबहुत्वेनमत्वाप्राप्नुयादन्नमित्यर्थः । अतिप्रयत्नेनापिविहितप्रकारेणबहुतरांभगवद्विद्यांप्राप्नुयादितियावत् । अन्नाख्यरूपंबहुमन्यमानस्यान्नंप्रसीदत्येवेत्याह । अराधीति । अस्मैअन्नंबह्वितिमन्यमानस्य । अन्नंअन्नाख्यं भगवद्रूपं । अराधि राधसाधसंसिद्धौ । सिद्धंभवतीतिविद्वांसआचक्षतेप्राहुरित्यर्थः । भगवदुपासनेप्रयत्नःसदाकार्यइतिफल

भेदोक्तिपूर्वकमाह । एतद्वाइति । मुखतउपक्रमत् ल्यपूलोपनिमित्तापंचमी । बाल्यमारभ्य । बाल्यवयसीतियावत् । एतदन्नाख्यंरूपं । राद्धंसिद्धं । तीव्रोपासनयाविज्ञातंचेत्तदास्मैउपासकायमुखतःपादमारभ्यअन्नाख्यंरूपंराध्यतेसिध्यति । पादावारभ्यशिरःपर्यंतंसर्वावयवोपेतंरूपंदृश्यते । अतोबाल्यएवप्रथमएववयसिप्रयत्नःकार्यइत्यर्थः । मध्यतःमध्येवयसिअन्नंराद्धंउपासनयायेनज्ञातंअस्मैमध्यावयवोहरेरुपलभ्यते । अन्यदंगजातंतेजोमंडलवदेवदृश्यते । नसम्यक् । एतदन्नंअंततःचरमवयसियेनराद्धंउपासनयाज्ञातं । अस्मैअंततःपादावेवराध्येते । सिध्यतःपादावेवोपलभ्येते अन्यत्सर्वंतेजोमंडलवदेवदृश्यते । नतु

क्षेमइतिवाचि । योगक्षेमइतिप्राणापानयोः । कर्मेतिहस्तयोः । गतिरितिपादयोः । विमुक्तिरितिपायौ । इतिमानुषीःसमाज्ञाः । अथदैवीः । तृप्तिरितिवृष्टौ । बलमितिविद्युति । यशइतिपशुषु । ज्योतिरितिनक्षत्रेषु । प्रजातिरमृतमानंदइत्युपस्थे । सर्वमित्याकाशे ॥ ८ ॥

सम्यगित्यर्थः । एतज्ज्ञानिनोप्यन्नाख्यरूपसिद्धिःफलमित्याह । यएवंवेदेति । एवंप्रथमादिवयस्येवप्रयतमानस्योक्तरूपभगवदृष्टिप्रकारं । योधिकारीवेदसोपिभगवदुपासनयातदृष्टिंलभतइतियोज्यं ॥ ७ ॥ भगवदुपास्त्यंतराण्याह । क्षेमइति । वाचिवागिंद्रियेक्षेमकृत्वहेतुनाक्षेमनामकोहरिरस्तीत्युपासीतेतिसर्वत्रयोज्यं । काम्ययोजकत्वहेतुनायोगनामादेहगतप्राणे । ॥ २८ ॥ क्षेमकृत्त्वेनक्षेमनामापाने । कर्मकृत्त्वेनकर्मनामाहस्तयोः । गतिदत्वेनगतिनामापादयोः । विसर्गकृत्त्वेनविमुक्त्याख्यःपायौ ।

SGDF
Sri Gargeshwari Digital Foundation

अस्तीत्युपासीतेत्यर्थः । इतिमानुषीः मनुष्यदेहसंबंधिन्यःसमाज्ञाःउपास्तयउक्ताइत्यर्थः । अथेत्यर्थांतरे । दैवीःदैव्यः । स माज्ञाइत्यनुषंगः । उच्यंतइतिशेषः । तृप्तिदत्वेनतृप्तिनामाहरिःवृष्टौवृष्ट्यभिमानिनिपर्जन्येस्तीतिउपासीतेतिशेषः । एवम ग्रेपि । बलदत्वेनबलनामाविद्युतिविद्युदभिमानिनिवायौ । यशःयशःप्रदत्वहेतुनायशोनामापशुषु । यज्ञपश्वाभिमानिनिदक्ष प्रजापतौ । ज्योतिःप्रदत्वेनज्योतिराख्यःनक्षत्रेषु । प्रजातिःपुत्रः । अमृतंसंततिपरंपरा । आनंदःसुखंप्रजासंतत्यानंदानां दातृत्वात्प्रजातिरित्यादिनामकःसन्उपस्थे । उपस्थाभिमानिनिशिवेअस्तीत्यर्थः । सर्वदत्वेनसर्वनामासन्नाकाशेप्रकृतावस्तीत्य

तत्प्रतिष्ठेत्युपासीत । प्रतिष्ठावान्भवति । तन्महइत्युपासीत । महान्भवति । तन्मनइत्युपा सीत । मानवान्भवति । तन्नमइत्युपासीत । नम्यंतेस्मैकामाः । तद्ब्रह्मेत्युपासीत । ब्रह्मवान्भव ति । तद्ब्रह्मणःपरिमरइत्युपासीत । पर्येणंम्रियंतेद्विषंतःसपत्नाः । परियेम्रियाभ्रातृव्याः ॥ ९ ॥

र्थः ॥ ८ ॥ प्रकृतौस्थितस्यगुणानाह । तत्प्रतिष्ठेति । तत्स्थापकत्वेनहेतुनाप्रतिष्ठाइत्युपासीत । प्रतिष्ठावान्भवति । स्थितिमान्भ वति । तत्महःमहत्वगुणयुक्तत्वात्महइत्युपासीत । सज्ञानादिनामहान्भवति । तन्मान्यत्वहेतुनामनइत्युपासीत । मानवान्भ वति । पूज्योभवतीत्यर्थः । तत्नम्यत्वहेतुनानमइत्युपासीत । कामाःकाम्यमानाअर्थाः । अस्मैनम्यंते । नमंतिआयांतीत्यर्थः । त त्आकाशेस्थितंब्रह्मेतिपूर्णमित्युपासीत । ब्रह्मवान् । रक्षकत्वेनतद्वान्वास्वयोग्यपूर्तिमान्वाभवतीत्यर्थः । तत्आकाशस्थं

SGDF
Sri Gargeshwari Digital Foundation

ब्रह्मणोविरिंचस्यपरिमरोमारकइत्युपासीत । एनंपरिपरितःस्थिताःद्विषंतःसपत्नाःबाह्यशत्रवःम्रियंतेप्राणान्जहति । येअग्रियाभ्रातृव्याःदेहस्थितशत्रवःकामक्रोधाद्याः । तेपिम्रियंते ॥ ९ ॥ वागादौवृष्ट्यादौस्थितरूपाणांभेदोनमंतव्यइत्याह । सयश्चेति । व्याख्यातमेतत् । ब्रह्मवल्यां । अन्नमयादिभगवद्रूपज्ञानिनस्तत्प्राप्तिरुक्ता । तामनूद्यतदनंतरस्थितिमाह । सयएवंविदित्यादिना । एवंवित्उक्तरीत्याअन्नमयादिरूपज्ञानीविरिंचादिःलोकाद्देहात्प्रेत्यनिर्गत्यपंचरूपाप्तिरुपलक्षणं । वाङ्म

सयश्चायंपुरुषे । यश्चासावादित्ये । सएकः । सयएवंवित् । अस्माल्लोकात्प्रेत्य । एतमन्नमयमात्मानमुपसंक्रम्य । एतंप्राणमयमात्मानमुपसंक्रम्य । एतंमनोमयमात्मानमुपसंक्रम्य । एतंविज्ञानमयमात्मानमुपसंक्रम्य । एतमानंदमयमात्मानमुपसंक्रम्य । इमाँल्लोकान्कामान्नीकामरूप्यनुसंचरन् । एतत्सामगायन्नास्ते । हा३वुहा३वुहा३वु । अहमन्नमहमन्नमहमन्नं । अहमन्नादो३हमन्नादो३हमन्नादः । अहꣳश्लोककृदहꣳश्लोककृदहꣳश्लोककृत् ॥ १० ॥

यादिरूपत्रयप्राप्तिरपिध्येया । कामान्नीकामभोगवान्कामरूपीइच्छाधीनरूपवान्इमान्लोकान्अनुसंचरन् । एतद्वक्ष्यमाणं सामगायन्नास्ते वर्तते । किंतत्सामेत्यतआह । हा३वुइत्यादिना । भोग्यत्वहेतुनाअहमन्नं । अहमन्नादोयथेष्टान्नभोक्ता । श्लोककृत्हरेःकीर्तिप्रकाशकृत् । हा३वूइत्यादौत्रिस्त्रिरुक्तिःसामत्वात् । सुखातिशयास्वादनाद्धेतिध्येयं ॥ १० ॥

ऋतस्यज्ञानरूपस्यविष्णोःप्रथमजोहमस्मि । किंमनुष्येभ्यःपूर्वजातइत्यतआह । पूर्वमिति । देवेभ्यःपूर्वजातोस्मीत्याह मुख्योधिकारीविरिंचः । अमृतस्यमुक्तवर्गस्यनाभिःआश्रयः । योधिकारीमाःप्रमाःविष्णुमहिमप्रतिपादकप्रमाणानि । ददाति । भक्तेभ्यउपदिशति । सइदेवइत्थमेवजीवन्मुक्तिदशायांमामां । अवाःआगच्छति । कार्यबादरिरस्यगत्युपपत्तेरितिसूत्रात् । वागतिगंधनयोरित्यस्येदंरूपंअवाइति । अहंअन्नंहरेरितियोज्यं । मुक्तस्वावरोपजीव्यत्वाद्वा । अदंतंजीवजातंअहमस्मि । ममान्नंसर्वजीवाइत्यर्थः । अहंविश्वंभुवनंसर्वजगत् । सर्वैर्गुणैःअभ्यभवं । अभिभूतवानस्मि । श्रेष्ठोस्मीत्यर्थः । तर्हिकिंस्वतंत्रःनेत्याह । सु

अहमस्मिप्रथमजाऋता३स्य । पूर्वंदेवेभ्योमृतस्यना३भाइ । योमाददातिसइदेवमा३वाः । अहमन्नमन्नमदंतमाद्मि । अहंविश्वंभुवनमभ्यभवां । सुवर्णज्योतीः । यएवंवेद । इत्युपनिषत् । सहनाववतु । सहनौभुनक्तु । सहवीर्यंकरवावहै । तेजस्विनावधीतमस्तुमाविद्विषावहै । ॐशांतिःशांतिःशांतिः ॥ ११ ॥ इतितृतीयवल्लीसंपूर्णा ॥ ३ ॥

वर्णज्योतीरिति । सुवर्णःशोभनोत्तमानंदरूपःस्वर्णकांतिश्चहरिःज्योतिःप्रेरकःअस्येतिसतथोक्तः । यएवंवेद । सम्यक्जानातिविरिंचः । सएवमुख्यज्ञानी । एवंसामगायन्नास्तइतिपूर्वेणान्वयः । यद्वावेदेत्युत्तमपुरुषैकवचनं । योहमेवंवेदसोहंसुवर्णज्योतीरितियोजना । इत्येवंप्रकारेणउपनिषत् । रहस्यमुक्तमित्युपसंहारः ॥ ११ ॥ तैत्तिरीयोपनिषदोभाष्याद्युक्तार्थसंग्रहः । राघवेंद्रेणयतिनाकृतःसज्जनसंविदे । इतिश्रीतैत्तिरीयोपनिषत्खंडार्थःसंपूर्णः ॥ श्रीकृष्णार्पणमस्तु ॥

(अयं ग्रंथः अ० रामाचार्य, टी. आर्. कृष्णाचार्यनामभ्यां मुंबय्यां निर्णयसागरमुद्रणयंत्रे मुद्रयित्वा प्रकाशितः । शके १८१८)

॥ तैत्तिरीयोपनिषत्खंडार्थःसंपूर्णः ॥

GDF
Sri Gargeshwari Digital Foundation